CC-0.In Public Domain. Digitization by eGangotri

Swan

नं. २ नौरहस्य द्वितियखण्ड

हाँसमाकों रातोकापिमा १लं बर. रहस्य प्रथमखण्ड
कोवाकि. यो २लं. दूतिय खण्ड गरिलेखियेकोछ

128 Pages.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

गच्छन्तीह्लरध्रेरा ऽविशन्ति पुनस्तनूं ॥ यातायतक्रमेणैव तत्र कुर्य्यात्मनोलयं ॥ तेनम
न्त्रशिरवा जाता सर्वमन्त्रप्रदीपिरागी ॥ तस्मप्पूर्णो गृहेमद्धन्किञ्चिन्प्रतिभासते ॥ शिरवा
हीनास्तथामन्त्रानसिध्यन्ति कदाचन ॥ शिरवोपदेशसर्व्वंगोपितः परमेश्वरि ॥ विना
येननसिध्यिह्यद्धकोटिशतैरपि ॥ तस्मात्यत्नेनकर्त्तव्यं शिरवायाभावनंमनोः ॥ अथचै
तन्यमन्त्रामाह ॥ मन्त्ररूपोभवेद्देवोदेवरूपीगुरुर्भवेत् ॥ गुरुरूपिभवेदात्मादात्मरूपीमनूभवे
त् ॥ इतिते कथितंदेविमन्त्रचैतन्यमुत्तमं ॥ यस्यविज्ञानमात्रेरा अद्वैतंज्ञानमुत्तमं ॥ अथवै
कूल्लूकोन्यानि कथयस्वमहाप्रभा ॥ कूल्लूकाकीदृशिनाथसेतुर्वादेवकीदृशः ॥ कीदृशो
नामहासेतुर्निर्वाराां त्वंकीर्त्तयेदृशं ॥ अन्यच्चाकथितंयन्मे किंदृशंतद्दप्रभो ॥ ॥ श्रीश्रीदउवा
च ॥ रहस्यमपिदेवेशितेदेविकथ्यते शृणु ॥ विनाएनमहेज्ञानिनिस्फलंतुज
पादिकं ॥ कूल्लूकाचतथासेतुर्महासेतुस्तथैवच ॥ निर्वाराां कूराडलीषट्चक्रसौत्पत्तिश
क्तिये ॥ विद्यानांकुलमूल्यत्वाकूल्लूकातेनकीर्तिता ॥ विद्यासंबन्धिदोषारणां भक्षयि
त्रीयतः प्रिये ॥ तेनयंकूल्लूकानांम्नासर्वतन्त्रेषुगोपिता ॥ विद्यासिद्धारणांवेदेवियेनपा
रंव्रजन्तिमतेनसेतुर्महेशानिविद्यामार्गः प्रकीर्तितः ॥ महाविद्याप्रियंदर्शीमहासेतु
र्महेश्वरि ॥ महाविद्याराीयस्याथचैतन्यस्यप्रदर्शकं ॥ महासेतुमहादेविमहाविद्या
स्वरूपाद्यक ॥ देवतायास्तुनिर्वाराांचैतन्यंयत्प्रकीर्तितं ॥ निर्वाराांकथितंभद्रेवि
द्यावाक्मातृकारणकैः ॥ निर्वाराांचमहेशानिपरब्रह्मात्मतात्मता ॥ चतुर्थंकथि
तंभद्रेविद्याचरराामीरितः ॥ पंचमींकूराडलिंभद्रेदेविंयथावदवधारयेत्रा ॥ मू
लाधाराद्विलान्तं विसतन्तुतनीयसीं ॥ सर्धदेवस्वरूपांचसर्ववरराप्रदीपिनीं
महाकुराडलीनींदेविमलीकूराडलिंपरं ॥ ॥ श्रीदेव्युवाच ॥ क्रमेराादशवि
द्यायाः कूल्लूकामविकथ्यतां विधिवद्दा ॥ ॥ श्रीश्रीदउवाच ॥ पंचाक्षरिकालीका
याः कूल्लूकांपरी[कथ्यते] ॥ ॥ [को]रीकूर्ल्लूकाभूतापसकुलापरमेश्वरि ॥ अघोराक्षो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऋषिः प्रोक्ता विराट् छन्दः प्रकीर्तितं · देवता कूल्लूका कालीबीजमायाभिधं मतं · कामः शक्ति
स्तथा कूर्च्चं कीलकं परिकीर्तितं · षट्दीर्घद्वयेन कामेन षडंगन्यास ईरितः · ध्यानपूजादि
कं सर्वं कालिकावत्समापयेत् ॥ मायावधू तथा कूर्च्चं तारिणी कूल्लूकामता · तारिणी कू
ल्लूकायाश्च विरूपाक्षो ऋषिः स्मृतः उष्णीक् छन्दः समाख्यातं देवता नीलतारिणी ·
कूर्च्चबीजं तथा माया शक्तिर्वधूच कीलकं · मायया तु षडंगानि सर्वनीलसरस्वती ॥ छिन्ना
याश्च महेशानि कूल्लूकाष्टक्षरी भवेत् · वज्रवैरोचनीये च अन्ते वर्म्म प्रकीर्तयेत् · अतिकालो
ऋषिः प्रोक्ता गायत्री च्छन्द ईरितं · हं बीजभूतथा शक्तिः कीलकं रावीनीमता · शिव षट्
दीर्घयुक्तेन · षडंगन्यासमाचरेत् · ध्यानपूजादिकं सर्वं छिन्नावत्समुपाचरेत् ॥ सूक्ष्म
याः कूल्लूका देवि संप्रोक्ता द्वादशाक्षरी · वाग्भवं कामराजं च लज्जा ~~लज्जा~~ च त्रिपुरे पदं ·
भगवतीति पदं प्रोच्य तदन्ते उद्वयं वदेत् · सुन्दरी कूल्लूकायास्तु ऋषिः रानन्द भैरवः · गायत्री
च्छन्द आदिष्टं वाग्भवं बीजमिरितं · लज्जा शक्तिर्म्महेशानि कामबीजं च कीलकं देवता त्रिपुरे
शी च षडंगं त्रिद्वयं न च · ध्यानपूजादिकं सर्वं सुन्दरी वत्समाचरेत् ॥ संपत्प्रदायाः प्रथमं
विजं श्रीभैरवीमनौ · विकरालो ऋषिः प्रोक्तः पङ्क्तिः च्छन्द प्रकीर्तितं देवता भैरवी नाम्ना
कूल्लूका परिकीर्तिता · हं बीजं सं महाशक्ति ~~स्फि~~ रमत्र कीलकं मतं · षट्दीर्घेन च बीजे
न षडंगन्यासमाचरेत् ॥ मातङ्गि वगला लक्ष्मी धूमोचिष्टा क्रमो अरणू · नाकूंच्च
कूर्च्चं नारसिंह्यैष्यंपानां कूल्लूकामता · ऋष्यिभैरवनामोच्च यावच्छंदांसि पार्वती ·
देवता सबबीजादि स्वस्वदैवक्रमेण च · ध्यानपूजादिकं सर्वं स्वदैवत वदाचरेत् · इयं ते क
थिता देवि संक्षेपात् कूल्लूकामया ॥ अथ दशविद्यां जिह्वाशोधनमाह · शिव उवाच
· अपरैकं प्रवक्ष्यामि जिह्वाशोधनमुत्तमं · यत्नकृत्वा महादेवि जपपूजा वृथा भवेत् ·
अशुद्धजिह्वया देवि यो जपेत् स तु पापकृत् · तस्मात्सर्वप्रयत्नेन जिह्वाशोधनमाचरेत् ॥
देव्युवाच · देवदेव महादेव शूलपाणे पिनाकधृक् · पृथक् पृथक् महादेव कथय स्वदयानि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

धे ॐ शिवउवाच · शोधनंसर्वविद्यानांमुखवत्प्रोधनंशुभे · श्रीबीजंप्रणवंलक्ष्मी
तारश्रीप्रणवंतथा · इयंषडक्षरीविद्यासुन्दर्य्याद्दशधाजपेत · भैरव्याः शृणुचार्वंगि
मुखशोधनमुत्तमं · प्रणवंचहसौंबीजंप्रणवंसुरवन्दिते · इदंहत्र्यक्षरीमन्त्रंदश
धाप्रथमंजपेत · शृणुसुन्दरि श्यामायाः मुखशोधनमुत्तमं · निजबीजत्रयंदेविप्रण
वेनितयंपुनः · कामत्रयंवन्हिबिन्दुशनिबीजंयुतंत्रिकं · इक्षानवाक्षरीविद्याजिह्वा
शोधनकारिणी · तारायाः शृणुचार्वंगि अपूर्वंमुखशोधनं · जीवनीभुवनालज्जा
भुवनेशीतनः प्रिये · त्र्यक्षरीयंमहाविद्याविज्ञेयामृतवर्षिणि · दुर्गायाः शृणुचा
र्वंगि मुखशोधनमुत्तमं · द्वादशस्वरमुद्धृत्यविन्दुयुक्तंत्रिकंतथा · अपरैकंप्रवक्ष्यामि
वगलामुखशोधनं · वाग्भवं भुवनेशानीवाग्विजंसुरवन्दिते · मातंग्याः शोधनंदेवि
अङ्कुशंवाग्भवंतथा · बीजंचांकुशमेताद्विविज्ञेयंत्र्यक्षरीयकं · लक्ष्म्याश्चशोधनंदेवि
श्रीबीजंकमलानने · प्रणवंदक्षनासूर्ध्वत्रयंवामकर्णविभूषितं · पुनःप्रणवमुद्धृत्य
विद्येयंत्र्यक्षरीमता · बालादेवांचसंन्यासांप्रणवंमुखशोधनं · त्रिसूत्राणांमहेशानि
ओंकारेणतुशोधनं · मूलशोधनमात्रेणाजिह्वामृतमयीभवेत · अन्यथामन्त्रविद्युक्ता
जिह्वाभवतिसर्वदा · भक्षणेदूषिताजिह्वामिथ्यावाक्येनदूषिता · कलेर्हेदूषिताजिह्वातत
कथंप्रजपेन्मन्त्रं · तत्शोधनमनाचार्य्यनजपेत्तामरः क्वचित · शैवेशाक्तेवैष्णवानांसर्वे
षामप्यवश्यकं · अन्यथाप्रजपेन्मन्त्रंमोहेनयदिभाविनि · सर्वंतस्यवृथादेविमन्त्र
सिद्धिर्नजायते · अन्तेनरकप्राप्तिर्भवेत्सापिनचान्यथा · देवीयदिजपेन्मन्त्रम
कृत्वामुखशोधनं · पतनंनंस्यवैदेवि किंपुनर्मर्त्यवासिनां ॐ अथआपोध्या
यः · आपोध्यात्करेनेतु तत्रदेहेक्रियाभवेत · तन्मेवदमहादेव यद्यहंत
ववल्लभा ॐ श्रीमहादेवउवाच · उत्कीलनंबंधनस्याच्छापस्तेजोनिरोध
कः · कीलनंतुमहेशेशि मन्त्राणांसर्वसिद्धिदं · तत्तुंमहादेविशापोद्धारेतुव

Prof. Madhav Prasad Ramchhabra Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

र्त्तुते । भक्तानुग्रहकामत्वाद्देवीसाधकसन्निधौ । गत्वा दत्तोवल्लीदेविसमये जातएवहि । मन्त्र
चैतन्यरोधत्वान्मृषाजातोमहेश्वरि । अयंशापोनिगदितस्त्वथोत्कीलनमुच्यते । भक्तानुग्र
हकामत्वाद्दातव्योहिवरःशिवे । बन्धनंस्यद्यदामुक्तिस्तदैवतुगतागतं । शक्तिस्तुतेदेवास्तुव
रदानेमहेश्वरि । यथादूरतरेवत्सेधेनुःप्रीतिस्तुवर्त्तते । बन्धनस्यद्यदामुक्तिस्तन्नपानंतदैवहि ।
कालीतारातथाच्छिन्नातेजःपुंजनिभामता । त्रयाणांतेजसंरोधंकोहिकतुक्षमोभवेत् । त
स्माच्छापादिकंनास्तिकालिकायामहेश्वरि । कालिकातारीणीच्छिन्नाउत्कीलनविमो
चिनी । दामसंत्रोटनंकृत्वाधेनूर्य्यातियथासुतं । भक्तानुग्रहकाम्यत्वान्नथेयंकालिकापरा
ताराच्छिन्नास्तभवेशीसर्वबन्धनविमोचिनी । शापेतुप्रस्तवोनास्तिकीलेनप्रस्तवोस्तिहि ।
कालिकायामहादेविसर्वदाप्रस्तवोस्तिहि । शापोद्धारनिरुक्तिस्तुशृणुयत्नेनसांप्रतं । वत्सो
निकटवर्त्तीस्योर्द्धेतुनिकटवर्त्तिनी । दुग्धाभावात्महादेविनैकद्येकिंफलंभवेत् । कालीतारेस
मायातेपुनर्दुग्धंयथाभवेः । शापनिर्मोचनोदेवपुनस्तेजःप्रवर्त्तते । वत्सबंधनमुक्तित्वान्फल
सिद्धिहिवर्त्तते । उत्कीलनबंधनंहिफलसिद्धिःसदाप्रिये । तस्मादुत्कीलनंभिन्नंशापोभि
न्नःप्रकीर्त्तितः । अक्षरष्टात्ययोदेविउत्कीलनविधौस्मृतः । मन्त्रचैतन्यरूपत्वाच्चैतन्यव्यत्य
यान्मन्त्रीपापभागीनरोभवेत् । तत्पापस्यनिवृत्यर्थंप्राणायामःप्रकीर्त्तितः । देहवन्मन्त्ररूपत्वं
द्व्यक्षरेवर्त्ततेशिवे । अक्षरव्यत्ययाद्देविहीनांगत्वंप्रजायते । शापदानेमहादेवीसर्वांगंसिद्धमे
वहि । विद्यमानायथागादेदुग्धंनास्तिमहेश्वरि । शापदानेमहेशानिचैतन्यंनास्तिशांभवि ।
उत्कीलनेमहादेविचैतन्यंसिद्धमेवहि । एकदासमयेकोपिसाधकःस्थिरमानसः । संस्यार
दक्षिणांदेवीसदाभक्तैकमानसां । द्यूतक्रीडांमयासार्द्धंप्रवृत्तांचविहायसा । गतासासाध
कोयत्रदलातस्यैवरंततेः । निवृत्तासामयाशक्तयुद्धेनमनसामुने । यतोमांत्वंविहायैव
गतासाधकसन्निधिं । अतस्त्वंशीघ्रफलदानभविष्यसिदक्षिणे । ततोदीनमनादेवीसं
तुतोषस्तवैनवैः । ततस्तुष्टोहमनयापुनरेनांससूचिवान् । महाविद्यांसंपूजितांजप्त्वायप्त्वां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सूमध्यमे । ततस्त्वं शापनिर्मुक्ता भविष्यसि फलप्रभा । ततः प्रभृति विद्येयं द्रुतं च फल दायिनी । साधकत्वं महाभाग जननीवंधसूक्तये । इत्युक्त्वानर्घ्ये शक्तुभार्गवस्य हिपेश्यतः भा र्गवाहिमुनिश्रेष्ठ लक्षस्यवमनोदधे ॥ अथआपोध्धार । शापोध्धारंप्रवक्ष्यामिवशिष्ट मुनिनाकृतं । चतुर्विंशतिलक्षाणिजप्त्वाकोट्येनशप्तवान् । अद्यप्रभृतिदेवेशीकालिके कालरूपिणी । नवमंत्रेश्वसंसिध्दिःकस्यनैवभविष्यति । इतिश्रुत्वामहादेवीप्रभुत्वा प्रसाद्यतं । उवाचपुत्रकिमिदं शापदानंकृथाकृतं । एवंफलंयथानस्यात्तथाकुरुमु नीश्वर । ज्ञानदत्तंदुराराध्यंदुर्लभंयत्सुरैरपि । ततःप्रीत्यावरंलब्धाज्ञान विज्ञानसंयुतं । उवाचप्रीतमनसाशापानोमन्त्रसंकटे । मातःक्रोधेनकथितंतत्रोपायमहंवदे । प्रणवंपू र्वमूध्वन्य धोरुपेचदक्षिणे । सिध्दिंकुरुद्वयंपश्चोच्यकालिकेनिपदंतत । मनोभीष्टफलंशी घ्रंदेहिद्वयविरामंपदं । जपादौमन्त्रमुच्चार्य्य जपानेचपुनर्व्यक्षेत् । हविष्यान्नेतनःसिध्दि रचिरात्परमेश्वरि ॥ अथमन्त्राय.ज्ञानमाह । अवशाम्यहृदयनेत्रज्ञानभो क्षोमनोःसख्यः । सिध्दिःसर्वविधानंस्यात्साध्यात्रिवसाधकोवंद्यः । श्रोत्रा दिनांज्ञानभावेमंत्रस्यग्रहणाभावात् । दारिद्र्यंचविपत्तिश्चनरकप्राप्तिर्यशोवंशः । दी नोदुःखभागीचपराजितशत्रुपीडितः । कुर्य्यादवस्थितचित्तोमन्त्रीश्रोत्रादिविज्ञा नं । स्वनासिकाग्रेश्रोत्रादीनांगुरुज्ञानंभवति । तदाकर्त्रयोलोकत्रयेपूजितोनरोमन्त्री । रामश्रोत्रोमृगाख्यादीहृच्छून्याःसदृशाःस्वराः । गर्जितंधूम्रभेरव्याअभावेरदृशौ स्मृतौ । मूलार्णामुखमादिकंहृदयंस्वरशक्तयः । सौरेतथागाणपत्यदौगसैवेथवैष्ण वे । भौतिकेचमनोवास्यहृन्नेत्रंयोज्यतेयथा । एभिरशेषमन्त्राणांहृन्नेत्रवदनानिच । असवोस्यपरिज्ञेयःसर्धतन्त्रेषुगोपिता । वीजेरक्तमुखासर्वेमूला र्णाहृदयंस्वराः । दक्षवामश्रुतौचारंडी विचारेमध्यमाननः । वीजाभावेमनोवि द्यूनेत्रमाह्यप्रणवभूमी [illegible] Prof. Madhav Prasad Timilsina Research Center, Kathmandu, Nepal प्रधानपूर्वपरगा

CC-0.In Public Domain. Digitization by eGangotri

विकरायत्रः दृश्यते · तत्र नेत्रं विजानीयान्मूखं च क्षूतजोक्षिनं · रक्तवर्जमनोमूलव
र्णमास्यं प्रकल्पितं ※ मालापूजा · इष्टमन्त्रेण मालायाः प्रोक्षः णं परिकीर्तितं
· ॐ माँ माले महामाले सर्वशक्तिस्वरूपिणि · चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्मे सि
द्धिदा भवेत् · वाग्भवं च तथा लक्ष्मीमक्षादीमालिकान्तथा · ङे · न्तां हृदयवर्णान्तो
मन्त्रेणानेन पूजयेत् ◇ मन्त्रध्यानं चिन्तयित्वा गुरुं मूर्ध्नि · यथावर्णादिकं भवेत् ·
मन्त्रं ध्यायेत्कन्ठमध्ये पीतवर्णं हिरण्मयं · महामायां च हृदये स्वात्मानं गुरुपादयोः ·
आज्ञाचक्रे ततः पश्चाद्गुरोर्मन्त्रस्य वात्मनः · देव्याश्चाप्यकतां दीत्वा सुषुम्नावर्त्म
ना ततः ※ अथ जपसंख्याकृतौ द्रव्यमाह · नाक्षतैर्हस्तपर्णैर्वा न धान्यैर्न च पुष्पकैः
· न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् · लाक्षाकूशितशिन्दूरं गोमयं च करीषकं
· विलोड्य गुटिकां कृत्वा जपसंख्यां तु कारयेत् ※ इति श्रीरहस्यसर्वागमसारे चतुर्वि
शपटलः २४ ※ अथ मन्त्रसिद्धिदीपो यथा · अथातः संप्रवक्ष्यामि सर्वतन्त्रेषु गोपितं
· मन्त्रसिद्धिकरं दीप्तं न वाच्यं यस्य कस्यचित् · शक्त्याद्यभर्गशाक्तेषु भक्तो वर्णप्रजायते · मं
त्रवर्णस्य दिवसे क्रमाद्दीपं प्रकल्पयेत् · सायं तु कूडवाहस्य वर्त्तिसूयं च तन्तुभिः · यावद्ज्व
लति दीपोसौ तावत्पश्यन्मनूं जपेत् · मन्त्रार्णख्यय दीपेषु ज्वलितेष्वथ तद्दिने · पू
न दीपे कृते सा तु दीपे संदृश्यते स्फुटं · इष्टं स्वकीयं कथयेद्याचयेन्मनसेप्सितां ददा
ति देवता तुष्टा गुह्यमेतत्प्रकाशितं ※ अथ सावरमन्त्रः पुरश्चरणं · अथ सावरमंत्रा
णां पुरश्चरणमुच्यते · कामरूपाक्षदेशे तु कामाक्षा यन्त्रदेवता · कामशैलोस्त्रियत्रा
सौ कामपीठं तदुच्यते · तत्र संलेख्य मन्त्रं हि वंशोपरि यथाक्रमं · गुरुणां वाचनीयः स्व
स्वयं पश्चात्पठेन्मनूं · ज्वालामुखी समीपे वा हिंगुलाया समीपतः · लिखित्वा प्रप
ठेन्मन्त्रं नान्यथैव प्रसिद्ध्यति · मूख्यतः स्त्रिसमीपे हि कामपीठे मनोग्रहः · अथवा
सर्वदेशेषु मन्त्रग्रहणमुच्यते · तालपत्रे मनूं लेख्य पूर्णकुंभं निधापयेत् · भास्करे गु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

गुरुं ध्यात्वा वाचयेच्च गुरुरविः ※ इतीमा वरणमन्त्रपुरश्चरणविधिः ※ अथषोढा न्यासपूरश्चरणं । देवीभावसमायुक्तः षोढान्यासपरोभवेत् दशविद्याविधोक्ता चदशधाभिन्नभिन्नता, प्रत्यकं षट्ऋषिः तंतंतद्ध्यानंचसमाचरेत् ऋषिः छंदादि कं यत्रकीर्तितंपरमेश्वरि । तद्देवतजगदित मनुके मूलदेववत्, ध्यानंछन्दादिकंसो गंदेवीवत्सर्वमेववत् । अयुतंचपुरश्चर्य्यान्यसेनक्रमयोगतः ※ अथसहस्रना मकवचाशां पूरश्चरणं । ईश्वरउवाच । सहस्रनामस्तोत्रेवृकवचेऽपिपार्थिति त्कवचोदितापोक्तासावैकार्य्यापुरस्क्रिया । यत्रनोक्तापूरश्चर्य्यातत्रकिंवाविधीयते । अयुतन्तुपुरश्चर्य्यास्तोत्रमात्रेप्रकीर्तिता सहस्रनामकवचेपुरश्चर्य्याकिंकमुना एवंपुरस्क्रियांकृत्वादशांशंहवनादिकं । तर्पणंमार्ज्जनंदेविक्षवित्परिकीर्तितं । महाका लमतेप्रोक्तं तत्रस्थंचेत्समाचरेत् । विघ्नसंतोष्यनेनैवसर्वसिध्यतिपार्थेति ※ हवलक्षकथं कार्य्यं पूरश्चर्य्यादिकंभवेत् । सहस्रनामरूपंवै किंदृष्टंपरमेश्वरि । तथाचकवचंदेविकिंरू पं परिकीर्तितं । शिवदेव्योस्तुसंवादोब्रह्मरंध्रेतिकीर्तितं ※ अन्यश्लोकाकेशतुल्याच्च शिरःशिरइतीरितं । चक्षुषोमूलंभवेद्देविदेवताहृदयंभवेत् । बीजंगुह्यमितिप्रोक्तं शक्ति स्तुपरगामता । सर्वाङ्गकीलकंदेविह्यर्थवादःप्रकीर्तितः । स्तोत्रमध्येस्थितंयद्वात्सर्व स्तोत्ररूपकं । एवंचदेवदेवेशिस्तोत्ररूपंप्रकीर्तितः । तथैवकवचंदेविज्ञात्वा पाठं पठेन्प्रिये अंगहीनेभवेन्नाशः सर्वथापरमेश्वरि । फलंस्तुत्यादिकंदेवि अंगमित्यभिधीयते । आ द्योपान्तंविनादेवि फलमर्धंप्रकीर्तितं । अत्रार्थेप्रत्ययोदेविषडंगाधोयथास्मृता ※ हवनंकवचादीनांश्लोकान्तेविहितंचवा । आद्योपान्तंपठित्वावापश्चात्तुहवनंम तं । अथवादेवदेवेशिनामान्तंहवनंमतं । आदौपूर्णतुसंपथ्यतथैवान्तेमहेश्व रि । मध्यनामानिपाद्योनिपूरश्चर्य्याप्रकीर्तिता ※ श्लोकान्तेभार्ज्जनादिकं । त त्रस्तोत्रोक्तविधिनापूरश्चर्य्यादिकंचरेत् । स्तोत्रमात्रंपठेन्नित्यं पूर्णां तदनुगणांनंच

Prof. Madhav Prasad Damichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

रेत् · संपूर्णहोमयोगोप्यकथितस्तु प्रियंवदेत् · समाज्ञानाभिषेकर्म्म कर्य्यादत्रमहेश्वरि ·※· साङ्गंकवचाख्यंच सायुज्यंस्तोत्रमीरितं · सान्निध्यं नामसाहस्रंत्रितयंपरिकिर्तितं ※ कवचंवचरूपंस्यात्स्तोत्रंसहचरोभवेत् · सहस्रनामस्तोत्रंतु पूजास्थाने प्रकीर्तितं पूजादूभर्गस्वरूपात्यात् स्तोत्रंसहबलिदानंतुमाररां · मन्त्रोराजापुरश्चर्य्याराज्यसंपत्तिरीरिता · सपत्यात्तु विनाराजा नशोभतिमहेश्वरि · संपत्तिमूलमेतद्धिसर्व्वमेवप्रकीर्तितं · होममन्त्राभिषेकंपर्जन्याख्यंतुघर्षणं · जलेदुर्गस्वरूपंवैत्वाहिषेकः प्रकीर्तितः · ब्राह्मणानां भोजनंतु दुष्टसैन्यप्रभक्षणं ※ देवतागुरुविद्यैक्यं त्रयैक्यं परिभाव्यच · सर्व्वसिद्धिश्च भूत्वागैलोक्याधिपतिर्भवेत् · यथाचराजाराज्यादौद्रव्यसैन्यं भयंभवेत् · सिद्धिराज्यंभवेद्देवितथैवपरिकीर्तितं · दुर्गाद्याम्बादिकंदेविदेशराज्यं यथामतं · तथैवसिद्धिराज्यस्यपुरश्चर्य्यादिकंमतं · मन्त्रोराजागुरोर्मन्त्रीगणोद्वाद्वारपालकः · साधनंसवमुद्राऽस्यसिंहासनमितीरितं · साधकेनतथाकार्य्यं एनलब्धंतुसिध्यति · नैमित्तिकंचकाम्यंचहृद्यद्विरदकौमतौ · होमधूपःपताकास्यात्तत्तुसिद्धभूमिकाः सिद्धिराजाधिपेदेविकिंनसिध्यतिभूतले · योढान्यासादिकंसेना देवताराज्यदायिका · यन्त्रंतु वज्रदुर्गंतु जीवचक्रंविभेदकं · कवचादिपुरश्चर्य्याप्रोक्ताकिं श्रोतुमिच्छसि ※ अथपुरश्चरणमाह · आदौयन्त्रस्यसिध्यर्थेतन्मंत्रपुरस्क्रियां · कृत्वा पूतप्रभातेनपश्चाद्यन्त्रस्यवाचरेत् · यथाधारे यथाद्रव्ये यन्त्रंसंलिख्ययत्नतः · तत्रावाह्यदेवंसंपूज्यविधिपूर्वकं · ध्यात्वाजपंवानिहोमंकृत्वादेवंविसर्जयेत् · एकैकवारमानेन मन्त्रायंत्रंस्मरेद्बुधः · इत्थंजपादिभिःसिध्येद्यन्त्रेनाराध्यतांक्वचित् · दिक्कालद्रव्यप्रभावोनन्यन्त्रोकार्य्यापूरकृता ※ अथद्वितीयपुरश्चरणेमन्त्रोमसिध्येन्यमेति पुनःस्तोपायमाह · तथाच · सम्यगनुष्ठितेमन्त्रेयदिसिध्निनजायते · पुनस्तेनैवकर्तव्यं यावत्सिद्धिमवाप्नुयं · पूनश्चानुष्ठितेमन्त्रेयदिसिध्निनजायते ·

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
Digitized by Siddhanta eGangotri Gyaan Kosha
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0.In Public Domain. Digitization by eGangotri

उमाथा मन्त्रकर्तव्याः सप्तशंकरभाषिताः ※ असिध्यत्वा गुरोरेवासिध्यासिध्यिन जायते ।
तदोपायंप्रकुर्य्यात्तत्तदोप्यमधूनोच्यते । अनुलोमविलोमेनयेविन्दुमात्रिकाक्षरैः जपे
त्संपूटितंमन्त्रंप्रत्यहंसप्तसंख्यया । एकमासंततोहोमादिकात्सिध्धाभवेत्मनूः । पूरश्च
र्य्योक्तमखिलमाहिकंचसमाचरेत् ※ कूरदैवतमन्त्रंभूतलिप्यापुटिकृत्, क्रमात्क्र
माच्छताधृनिंकूर्य्यात्सिध्धिस्तुमानसः ※ अचोहयरवलाश्चानि मादितिद्विचतुर्थकं
तृतीयंचक्रमेणैववर्गानामक्षरंपठेत् । उषाग्रंततश्चैवद्विचत्वारिंशदक्षरैः ।
अभ्यूह्यदेवतेजाते पश्चात्तोरसहस्रकं । त्रिकालंगन्धपूष्पाद्यैर्निशिथेचैवमैथूनः
षड्मासंकौलिकाद्यैश्चअर्चितासूप्रसीदंति ※ शापतोवाकीलितत्वात्तत्रोपायाश्च
कंभवेत् । संपाताथायनंद्रावोबोधनंचप्रकीर्तितः । पीडनंबोधनंशौचदहनंतत
क्रियोच्यते । भूर्जपत्रंसमानीयपद्मपत्रदलंलिखेत् । अष्टगंधेनदेवस्यरोचनो
चंदनेनवा । साधकस्यतुनामार्णौ मंत्रंसंदर्भितंलिखेत् । यावत्तद्मोसमाप्तिः स्यात्त
स्यचाद्यंतयोर्लिखेत् । तारादिकं साधकस्यनामाधारदले बुधः । दीर्घौलक्ष्मीस्वरौ
तच्चमस्यऽध्यायमूधात्मकं । तत्संवेक्ष्योमदासमग्नेश्चयेद्ब्राह्मणादिकः । शुक्ला
दिवर्णाया(प)श्चात्सिक्थेन(कल्प) केनचलेखयेत् । क्षिप्रेत्रिमधूरेतन्तुरागमयेलघुभाजनः । क्षीरधू
र्णेनवेकूंभेतक्षिपेल्लघुभाजने । अग्निसंस्थापनंकृत्वासंनिधौतस्यतंघटं । संस्थापयो
त्रिमधूरैर्मूलमन्त्रेणहोमयेत् । अष्टाधिकेसहस्रंतुसंपातंकलशेक्षिपेत् । होमंसं
माप्यतंकूंभंनिक्षिपेच्चजलाशये । अष्टाधिकंस्वगुरुंब्राह्मणांश्चानैर्भोजयेद्दक्षिणादि
भिः । संपाताथायचैतन्यमुक्तंसिध्धिनचेद्भवेत् ※ द्रावणंतुतदाकुर्य्यात्प्रकारइहो
च्यते । वंशीजेनग्रथयित्वाभूर्जपत्रेलिखेन्मनूं । क्षीरशोचनाभ्यांचशिलाकर्पू
रकूंकुमैः । क्षीराक्ष्यंमधूतोयोतांमधवंनलिखितंक्षिपेत् । पूजनाच्चजपोहोमा
त्तद्रावितः फलदोभवेत् ※ द्रावितोपिनसिध्धश्चेद्वेधनंप्रकारयेत् । नाभवे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नचवीजेनसंपुटीकृत्यतंजपेत्- एवंबुध्दोभवेत्सिध्दोनोचेत्कूर्य्याद्वृथीकृतं · कूचंदनंम हाद्रा हरिद्रामदनशिलाः · एतैस्तुलिखितोमन्त्रोभूर्जपत्रेसुशोभने · कंठेधृतोभवेद्वश्यो नोचेत्कूर्य्याच्चपीडनं ※ अनुदात्तस्वरेणाद्यभूदात्तेनाद्वितीयकं · तृतीयमनुदात्तेनप ठेन्भूर्जेभूदात्ततः · एवंपदानिसर्वाणिपठेमन्त्रस्यसाधक · अनुदात्तपदोच्चारदेवंध्या यदधःस्थितं · उर्द्धस्थितंभुदात्तस्योच्चारेत्तादिसहअकं · अपेन्तंततोभूर्जो भान्दूग्धेव लेख्येत · मंत्रंतंमाक्रमेद्वामपादेनाथचहोमयेत · अष्टोत्तरशतंमन्त्रः पीडितः सन्प्र सीद्धिति ※ नसिध्दश्चेत्तदापोह्यः प्रोच्यतेतत्क्रियाधुना · सोः वीजापुटितंमन्त्रंविलिखेद्भूर्जपत्रके · रोचनाकूंकूमाभ्यांचधारयेद्बधिदृध्वयोः · इदंपाशरणाभिन्युक्तंपोशरणंप्रो च्यतेधुना · यत्तस्यभस्मनालेख्यं वायुवीजंविदर्भितं · भूर्जपत्रोत्थेदमन्त्रंतत्कंठेधार येदिति · एतच्छोशरणाभिन्युक्तंहृदयंप्रोच्यतेधुना · पृथक्पृथक्स्वमन्त्रार्णान्चतुर्दिक्षुस माकृतान् · रंवीजेनपलाशस्यबीजतैलेनसंलिखेत् · भूर्जपत्रेथतद्धार्यंकंठेदाहक्रिया लियं ※ शीलघ्नसंस्कार ※ अथमन्त्रार्थप्रकरणं ※ मन्त्रार्थंमन्त्रचैतन्यंयोनिमूद्रा नवैकियः ज्ञातकोटिजपेनापितस्यसिध्दिर्नजायते ※ तत्रादौगुरुमन्त्रार्थ · यथा · अथातः संप्रवक्ष्यामिमन्त्रार्थंगुरुनामतः · गुकाराज्ञानसंपन्निरुकारारत्नभ्रकाशकः · उकारात्शिवशक्तिताद्दात्म्यंदर्शादिगुरुस्मृतः · गुरुदेवतयोरैक्यंभावयेत्परमेश्व री · इडानाडिस्थितचन्द्रपिङ्गलाभास्करवाहिनी · सुषुम्नामध्यमार्गस्थात्रिनाडिचप्रकी र्तिता · सुषुम्नाभेदरूपाणीदहनंपापनाशनं · गुरुनामप्रयत्नेनपरतत्वंचप्राप्यते ※ अ थशिवमन्त्रार्थमाह · ॐकारंप्रथमंविद्यान्नकारंतुततःपरं · मकारंतत्परंविद्यात्शिकारंतु ततःपरं · वाकारंपंचमंविद्याद्धकारंतुषडक्षरं · एवंपंचाक्षरेसूत्र्यादूतदक्षिणथाशि वे · प्रणवेब्रह्मछिद्रस्थाब्रह्मैवाहंनसंशयः · मन्त्रार्थःकथितोपश्चात्तेनमुक्तिःप्रजायते · सत्यज्ञानपरानन्दस्वरूपशिवकेवलः · आनंदेकृतयोरैक्यात्शिवस्तेनसमोभवि

CC-0. Madhav Prasad Ghimire Collection. Kathmandu. Nepal

CC-0.In Public Domain. Digitization by eGangotri

वाचकोयंततःशब्दोब्रह्मणश्चित्कलात्मनः नमःशब्दोनमस्कारवाचकपरिकीर्तितः · प्रह्व
त्वलक्षणाःप्रोक्तोनमस्कारपूरातनैः · प्रहूतानामजीवस्य·शिवान्सत्वादिलक्षणात्
भेदेनभासमानस्यमायायासर्वरूपतः · संबन्धंनमःइत्याहशिवतादात्म्यलक्षणं ·
नित्यंशुद्धःशिवःसाक्षात्स्वरूपःसर्वदेहिनांतस्माद्धूःस्वोजीवस्यनोपदेयंहिवेदा·स
होयमपिवादद्वस्तुतोनप्रतीतितः · एवंविधानकारार्थंमकारार्थंप्रदीर्यते · मकारो
ममशब्दार्थोलुप्तस्त्वेकोमकारकः · व्यवहारिकदृष्ट्यायंनमस्कारःप्रकीर्तितः · तस्मा
त्चतुर्थीसदृस्मृप्रोचतेनापिवस्तुतः · ॐकारसर्वमन्त्रार्थवाचकपरिकीर्तितः · प्रयो
गादेवसर्ववस्तुसर्वार्थःशिवएवहि · तस्माच्छिवस्यपूर्णस्यप्रणवोवाचकःस्मृतः · वाच्य
वावाचकवास्यलक्षणाक्षणाताप्रिच · अन्यथापिचनास्त्येवपरमार्थनिरूपणे · अथ
वादेवसर्वस्यशिवादन्यस्यसर्वदा · नास्तीतिस्यान्मृषाभागिनहानीत्यादिमायया·
कल्पितंचिन्मूर्खानंदंपरमार्थशिवात्मकं · मायातत्कार्यरूपस्यस्माच्छिवान्सत्यादिलक्ष
णात् · प्रत्यक्षसिद्धेनास्त्येवःपरमार्थनिरूपणे · अथकिंवहूनोक्तेनशिवादन्यंनवि
द्यते · शिवस्वरूपमेवाहरिदंसर्वंविचक्षणाः स्वस्वस्वरूपमज्ञात्वाद्दश्यतेनतुवस्तुतः ·
एषएवहिसर्वार्थसेव्यंसर्वंचनान्यथा · बाध्यबाधकतायांतिव्यवहारेपरस्प
रं · समूद्दइवकल्लोलाइतिमन्त्रार्थसंग्रहः * अथकालीमन्त्रार्थः · ककाराच्छिव
रूपत्वात्केवलंमोक्षदायिनी · ज्वलमार्गसमायोगात्सर्वतेजोमयीप्रभा · चिन्दूमा
लीकेवलन्तुसर्वतत्वप्रकाशिका · विन्दूनानिष्कलत्वाच्चकैवल्यफलदायिनी ·
दक्षिणासिद्धिसाध्यार्हिरहितासिद्धिदा · कालसंकलनात्कालीकालग्रासं
करोन्यूतः · इत्येतत्कथितोमन्त्रस्यार्थोन्तराविमूक्तये · एवंचिन्तनमात्रेणकिं
नसिद्ध्यतिभूतले ·x· अथतारायाः स्वयंलीलयाधरंविष्वमूर्तिर्मौचेन्नचैवं
कथंचन्द्रचूडः · तदाद्रेःप्रथमोऽसौधूःप्रवाहीगंगानिर्गमोयंजनांत्रिनेत्रः विधा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तायदासमानत्वात्स्वयंसः स्वयंभूः कथम्यात्तदानीं निभूरणेनूतानाभिधेधानज्ञातः कलौके.
जगत्यादिभूगत अक्षमस्मेचनुभिः स्वहस्तैर्ददौयाचवक्त्रंनूवेदानोभूत् . अतःसन्निवाणी
यूगादौनिवेदाजगत्यादितंदंशसमायंद्विवीजं . ततःस्यान्द्विपादेतिवेदानिनोमांनदानीचि
देकाक्षरंब्रह्मबीजन्तुकूर्च्चंजगन्नित्यादि तत्तोद्यंयदासार्धपंचाक्षरीमाजगत्तारणादूग्नाराप्र
सिद्धा . विनारकंसापरैकाजदास्या . अजगन्नित्यादि . इदंयेजनास्तोत्तराजंविदनिप्राप्तीच्छा
श्रतेगद्यपद्यप्रसंशे . अगदूपपरागाधिमुक्तोतिपूर्णांशरीरान्तरेयानितारासमीपं . विपत्तौ
निशार्द्धजापानेप्रभाते पठेद्वाल्लभक्त्यातदर्थंविचिन्त्य . भवेन्नीलवान्याद्विरेफांघ्रिपद्मे
सजीवस्तुहंसः सजीवस्तुजीवः . इतिश्रीअद्वैतनिरूपणेतन्त्रार्थविवरणात्मकतारास्त
र्थंसंपूर्णं ॥ अथश्रीमहात्रिपुरसुन्दर्य्यामन्त्रार्थमाह . श्रीभैरवउवाच . लकारपृथि
वीदेवीसशैलवनकाननेनो . पंचाशत्पीठसंपन्नासर्वतीर्थमयीदरा सर्वंगामयीसर्वक्षेत्र
स्थानमयीप्रिये . सकाराच्चन्द्रतारादिग्रहदेवस्यरूपिणी २ हकारात्शिवसंयोगाद्व्योमंमंडलसं
स्थितो . इकाद्विश्चक्रकर्त्रीयंमायाभूर्व्योमिकाप्रिये ३ एकाराद्वैष्णवीशक्तिर्विश्वपालन
तत्परा . रकाशरेजशांयुक्तापरंज्योतिःस्वरूपिणी ४ ककारात्कामदाकामरूपिणीस्फू
रद्व्यया . अर्धचन्द्रेतुदेवेशिविश्वयोनिरितिस्मृता पंचैतेशिवरूपेणासूक्ष्मरूपेणसा
क्षिणी . अनयासदृसर्वत्रव्याप्तिर्निश्चलतात्मना ६ श्रीचक्रमभिदेवेशिमेरुरूपंनसंशयः
सकलाभूवनेशानीकामेशीबीजमूत्तमं . अनेनसकलाविद्याकथयामिविशेषतः . शक्ति
तमूर्य्यवर्णीयंकलांमध्येसूलोचने . वाग्भवंपंचवर्णाढ्यंकामराजमथोच्यते . मादनं
शिवचन्द्राढ्यंशिवांतंनीललोचने . कामराजमिदंभद्रेषट्वर्णंसर्वमोहनं . शक्तिवीजंबरा
रोहेचन्द्राढ्यंसर्वमोहनं . चतुरक्षररूपंतुपंचाक्षरात्रिपुरापरा . इतिसूचनामन्त्रार्थउर्ध्वाम्नाय
॥ बालकसंस्कारमन्त्रमाह . अथातःसंप्रवक्ष्यामिबालकस्यचमन्त्रमं . वाग्बीजंप्रथमा
मन्त्रोनारदोस्यमनोभवेत् [illegible] वाग्भवोपरिकीर्तितो . वीजपूर्वेश्रवद्वी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

धौः षडङ्गविधिरीरितः · श्वेतांबरांश्वेतवर्णां श्वेतगंधानुलेपनां सुधाकुंभंचपंचवी
णापुस्तकमेवच · करैर्दधतीं मीनस्थां भुक्ताभरणभूषितां · एवंध्यात्वाकरीं कायां
यजेद्वीषडक्षके · रुद्रधारांप्रणमामि फलंविद्मूमतींतथा · प्रभावतीं भानूमतिं भूपूरंतुदिगीश्व
रीम् · लक्षत्रयजपेन्मंत्रंपश्चर्वाद्वैस्तथादूनेतर · तर्पणादितत: कृत्वासिद्धमन्त्रप्रजा
यते · सद्योजातस्यबालस्यजिह्वायांबीजमालिखेत् · मधुनास्वर्णलेखन्यासोश्व
वैः कविर्भवेत् · वाग्मत्वायाथगंगायांपुरश्चर्य्यांकरोतियः · द्वितीयस्याघृतिंगा
हीभिक्षाशीवाथमौनवान् · ब्रह्मचारीभूमिशायीश्वेताम्बरधरःशुचिः · वांछि
तंलभतेवश्यंदाताभोक्तात्वयाचकः ॥ इतिश्रीरहस्यसर्वागमसारेपञ्चविंशप
टलः २५ · अथदशविद्यायाः मन्त्रसंख्यामाह · दशलक्षप्रभेदैश्चकालिविद्याकलौस्थि
ता · दशपूर्वैः शतलक्षैः सुन्दरीकीर्तिमुर्वि · त्रिनिरवर्धंतुतारास्याच्छिन्नाया: खडमात्रकं · पं
चाशीतिसहस्रैश्चलक्षपंचकसंयुता · भुवनेशीमहाविद्यावगलांशरणंमादरं · तत्वलक्षातु
वगलांसहस्रनवनीर्गता · धूमावतीमहाविद्याशीतिसप्तभैरवी · मातंगीनेत्रलक्षाचक
मलालक्षपंचका · एतेमंत्रवलिकायोगान्प्रस्तारास्तुविनिर्गता ॥ अथकौमारीजातिभेद
फलं · विप्रासर्वैश्चसंसिध्यैयत्नमेक्षत्रियोद्भवां · वैश्यजांधनलाभायपूजाशैशूद्रजायजेत् ·
अग्निमाद्यश्चवैदेविभवेत्कन्याश्चकंशिवे · दासीमायाघृणंप्रोक्तासद्यसिध्यप्रदायि
नी · वैश्याप्रयागंदेवेशिकोटिसिध्दिप्रदायकं · खेरिसावाच्छिताद्यर्थंकूटिनीसर्वक
र्मसु · दूतीप्रीतिविधौवश्यकुमारीपरिकीर्तिता · सर्वंसाक्षात्प्रसिद्ध्यर्थं बलदेवतासि
द्धैदेहसिद्धौकिरातिनी · पार्वतीयासर्वकार्येमनोरथमयीकला · धाराडालिनीराज्ञसि
द्धौराज्यसिद्धैकुविन्दजा · विद्यासिद्धौराजसुताक्रमेणापरिकीर्तिता · सर्वंवाञ्छाप्रसि
द्ध्यर्थंप्रोक्ताश्रीबालसुन्दरी ॥ नवकोमारी · अद्यासुध्दबालिकान्यायतीमालालिना
स्मृता चतुर्थीमालिनीमन्त्रं पंचमीयाद्वयंयुता · सप्तमीदुर्गातुनवमीभ

Prof. Mahadev Prasad Kandel Manuscripts Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वेत ※ पुरुषस्य · पञ्चान्नवर्षश्च यजेद्बालं विचक्षणाः · पंचाद्वोवट्कः प्रोक्तानववर्षो गणेश्वरः
※ अथप्रसंसत्विविध प्रायश्चित्तमाह · प्रयोगंनैवकर्तव्यंसाधकैः सिद्धिकांक्षिभिः · प्रयो
गान्नरकः प्राप्तिः परलोको नविद्यते · प्रयोगांश्चापमाप्नोतिप्रायश्चित्तीतुसाधकः · प्रयोगदो
षशांत्यर्थंलक्षमात्रंजपेन्मनूं · मारणेचाहृतेद्वेषेलक्षमात्रान्सुचिर्भवेत् · वश्याकरणतथा
भीन्दौलक्षंवाप्ययूतंजपेत ※ ईश्वरउवाच · शृणुदेविप्रवक्षामिप्रायश्चित्तविधिन्नवः गुरु
त्यागकरःशिष्यः प्रायश्चित्तीभवेध्रुवं · लक्षंश्रीपादूकंजप्त्वातस्मात्पापाद्विशुद्ध्यति · मन्त्रत्या
गकरोयस्तुतत्संगंवर्ज्जयेत्प्रिये · लक्षमेकंजपेत्मन्त्रंहोमतर्पणतः शुचिः · सर्वेषांमेवपापा
नांशंकरेसमुपस्थिते · प्रायश्चित्तंविजानीयादयूतंमन्त्रजापतः · नित्यादिक्रमदोषाणां
शांत्यैविद्याशतंजपेत् · नैमित्तिकातिक्रमेणसहस्रंप्रजपेन्मनूं · यदिदैवात्प्रशौर्विद्या
लभतेकूलजैन्नरैः · द्विजन्तुकौलिकंप्राप्यपूनर्वीद्यामूपालभेत् · सकलोवीजहीनस्तु
सन्दिग्धौनिन्दितस्तथा · मनेवस्तुनसिद्ध्यंतिगुरुः स्याद्ब्रह्मघातकः · तदातंसहसाज्ञात्वा
मन्त्रंदेवंगुरुंत्यजेत् · लक्षत्रयंजपेल्वोपां लक्षंम्वाप्यजपाजपेत् · होमयेद्धविषान्ते
ननिष्पापश्चोत्तथाध्रुवं · एकपात्रेपिवेद्रव्यंवीरोमहेश्वरोयदि · स्वानोच्छिष्टंभवेत्पा
नंप्रायश्चित्तिसकौलिकः · गायत्र्यास्तुसहस्रेणउपवासत्रयेनच · सम्यक्शोधितचित्त
स्तुसुवर्णगुरुदेवदेत् · वलातस्वरतोवापियोरमेन्मत्रमात्तरं · शदलक्षंमनुंत्वाहुवा
नलंसमाचरेत् · मन्त्रपुत्र्याः स्वपुत्र्यश्चभगिन्याश्चकुलस्त्रियः · रमणाल्लक्षजापेन
पूतोभवतिकौलिकः · ※ कृत्वावीरवधंमन्त्रीवृथापानंगुरोः स्तुषां · मन्त्रपुत्रीम्वी
रपत्नीरमित्वालक्षसोजपेत् · अनस्थिप्राणिसंघातेहत्वावनरकंव्रजेत् · हत्वा
चपक्षिणस्यर्वान्स्त्रियंचैकादशंजपेत् ※ सर्प्पमार्जारकुक्कुरमुखमूष्ट्रख
रंहयं · गजन्वाथमृगान्सर्वान्हत्वाचाष्टशतंजपेत् · जपेदष्टसहस्रस्तुक्षुद्रद
स्तुवधेकृतं ※ वलिदानंविनामन्त्रीपातयेन्नपशून्क्वचित् · अन्यथास्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नुमुदितंप्राप्यश्चित्तमनिर्भिः ※ गोवधेदशभिर्लक्षैर्मुच्यते नरकार्णवात् । ल
क्षैर्दशभिर्मन्त्रीवृषंहत्वाविमुच्यते । गुरुंहत्वाप्रमादेनपंचलक्षैर्भवेच्छुचि ※
दशभिःकोटिभिर्मन्त्रीस्त्रीवधाद्विमुच्यते । प्रमादात्प्रतिनेविप्रेलक्षैर्विंशतिभि
र्शुचिः । क्षत्रादयोयथोक्तेनमुच्यतेकिल्बिषादिह ※ ब्राह्मणस्यवधेलक्षंक्षत्रेतेयद्वि
गुणंस्मृतं । वैश्यंत्रिगुणमूद्दिष्टंमादयेचचतुर्गुणं । अर्हद्बोद्धावधेमन्त्रीतेषां
लक्षमनुंजपेत् ※ वत्सोश्वशूकराणांश्चवधेपञ्चसहस्रकं । क्षिप्रांहननेमन्त्री
द्विसहस्रेणशुध्यति । सर्पमार्जारमत्स्यानांवधेनेदसहस्रकं । देवेन्द्रोक्तगुरो
द्रोहाद्भक्षणेलक्षत्रिंशत्कोटिमन्त्रंजपेत् । क्षिप्रं देवद्वयंगुरुद्वयंभुक्त्वातावन्मनुं
जपेद् । निन्दनेसमयानाच्चयोगिनीवीरयोषितां । शास्त्राणांमन्त्रिणांस्त्रीणांस
हस्रंजपमाचरेत् । अथवादक्षिणाग्निसिद्धानेशैवव्रतधरेहरे । चन्द्रकोटिमितंमन्त्रीजप
शुध्यतिकिल्बिषा । अर्घ्यादिनिन्दनेमन्त्रीदशावर्तनशुद्धयति । अर्घामृतंपिबे
त्पूर्णंदेवीमूर्थापयेत्ततः । पशुपात्रंभवेत्तस्यतत्क्षयोलक्षयोभवेत् । अनिवेद्य
नुयःभुङ्क्तेप्रजपेत्सप्ततासहस्रकं ※ वीरपात्रेदधाणानंवीरपूर्णांस्थूणांतथा । प्राय्श्चि
त्तंश्चरेन्मन्त्रीदीक्षावीरार्चनादिकं । दीपनाशेपात्रनाशेपात्रप्रस्खलनंतथा । पूज
यित्वामहादेवींजपेदक्षोत्तरंशतं । अज्ञानादेतदुच्छिष्टंज्ञानतोद्विगुणंभवेत् ※ दग्धंच
स्फुटितंयत्रंहृतश्चारेणवाप्रिये । विदिर्णंछुछुरेखंचदुष्टायंचशतंप्रिये प्रियेलक्षमात्रंज
पेद्विघ्नोहोमतर्पणापूर्विकां । लङ्घनाक्रमाचारंतोव्यत्यब्राह्मणानपिभाजयेत् । शक्तिपूजा
तत्कार्य्यादुर्य्यादक्षांशकंबुधः । पंचपंचकंवापिकालीतारानुसारतः । कदाचिच्छु
प्रचिन्हंवास्फुटितादिविभूषणं । भग्नंनष्टंकरोमर्त्योमृत्पूत्तस्यभवेद्ध्रुवं । तस्मात्सतार्थ
राजेवागंगादिसरिताम्बरे समुद्रेवादक्षिपेद्धेवि अन्यथादुःखमाप्नुयात् । विद्यामात्रे
त्विदंकार्य्यं विद्येशंसगुरुंसाक्षं । लिंगेवागोनलेहोमयंचयोनदूष्यति । सलाकंचा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दिनोभग्नान्नदाद्विघ्नं नदृश्यति । शालिग्रामशिलामात्रेभंगेमृत्युकृतोभवेत् । भूमौपादं करोधृत्वेनेत्राद्दिमस्तकेशिवे । हृदयाचारमेयत्सर्वं नश्यन्तिपार्वति । तांमूर्तिंविसृजेद्देवीं पुनः मूर्तिंसमाचरेत् । महाविद्याविधौदेविविशेषंशृणुसादरं । यत्रदेवीगतोदेविनद्देशेतस्थलंतेजोर । प्रायश्चित्तंततः कृत्वासुखमाप्नोतिसाधकः । वातामानेयकोमारींचार्द्धांगेचारुचर्चितां । प्रसूनमेचेसंस्थाप्यसांगांसावरणांयजेत् । दध्वा; स्वरूपंदेवेशिनद्धतस्याः स्वरूपकं । विभाव्यप्रजपेद्देविसंप्रदायानुसारतः । उपवासंप्रकुर्वीतदिनभेकंमहेश्वरि । लक्षमात्रंजपेन्मंत्रेजपतर्प्पणमेवतः कूष्मार्ण्डमेवसंपूज्यतन्नद्दीपात्समाचरेत् । त्रिशक्तिपरविद्यादीपराजंसमाचरेत् ※ दीपात्रेदीपिनीजङ्घादोहीनस्तदाभवेत् । सिंदूरेरागकृतंयन्त्रंमूलेनावेष्टितंततः । तत्कोरोचनीजन्यकज्जलीकूष्मांडलिख्यतद्दीपंसमाचरेत् । अष्टगंधेनकेनापिगन्धेनाथसुगंधेनच । दिव्यवर्णानदेवेशितेनसिद्धीश्वरोभवेत् । पश्चिमाभिमुखंदीपंपात्रंत्रिपलमात्रकं । सौवर्णंराजतंताम्रं मात्रिकंधातुयंभवेत् । दीपंकृत्वाप्रयत्नेननवविंशतितंतुभिः । त्रिपंचनवरूपैश्चवितस्तिवर्तिकांचरेत् । गोघृतेनपलार्द्धेनआज्यपात्रंसमाचरेत् । चतुरंगुलमूर्द्ध्वायंसार्द्धांगुलसमुन्नतं । वध्नंगुलांगुलप्रोक्तंकवचंसप्रधारयेत् । दीपस्यदेवीसंपूज्यसांगासावरणांशिवे । एवंक्रमेणादेवेशिसिद्धिमाप्नोतिसाधकः । बलिदानंततः कूर्य्यात्सात्विकादिप्रभेदतः । आपउद्धारकंजङ्घादोहीनोनरोभवेत् । अयंचनित्यदीपोहीत्रिशक्तिविषयेमतः । अयंचनित्यदीपोहीत्रिशक्तिविषयेमतः । प्रायश्चित्तंप्रसंगेनाकीर्तितःपरमेश्वरि । एवंदोषविनिर्मुक्तः पुनर्यन्त्रंचसंग्रहेत् । उक्तसंस्कारमासाद्यस्वगुरूक्तेनवर्त्मना । महाविद्याविधौप्रोक्तंध्रुववैदभवयो शृणु । उपोष्यशुचिनीमेकामघोरंक्षमात्रकं । तद्दशांशंहोमकर्म्मदोहीनस्तुतोभवेत् । सूदकानवेभवेत्सौरेहंसंजपेच्छिवे । गालवेश्रीहरिद्राक्षजङ्घासिद्धीश्वरोभवेत् । अन्यथाकृतेयत्नेतस्यपापोभविष्यति । अनुत्रयोमंछानिदिव्यौघाश्चात्रिपार्वति । कौलिकः पशुगा

Digitized by Siddhanta eGangotri Gyaan Kosha Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

निश्चयपरा किमेद्वलात्. गोष्ठिमध्येशयनेनस्पर्शनस्यनकारयेत् ※ अविवेकविना
भूतेआचार्य्येत्यक्तशेतियः. योनिकोटिशतंयातिरौरवंनरकंव्रजेत् मात्रूपंपरित्यज्यस्त्रीरू
पंशक्तिमादरेत्. सयातिनिरकं घोरं जन्मकोटिशतानिच. परंलक्षजपंजप्त्वाअजपालक्ष
मेवच. तुर्य्यावीजंपश्चलक्षंतत्शूचिंसमाचरेत् ※ अथमालापनमादौप्रायश्चित्तमा
ह. प्रमादात्मालिकाभंगेप्रायश्चित्तंसमाचरेत्. रहस्यमालाभेङ्गेतुदशात्त्यागवलिं
नरः. अग्निदग्धेविलक्षंच नष्टभग्नेद्विलक्षकं. चौरतानिषड्लक्षंपतितेत्रिश
तंजपेत्. कराङ्गुष्ठेशतंव्यक्तंप्रजपेद्विंशतंशतं. पूरश्चर्य्याजपेहोमेमालाहस्तच्युता
यदि. प्रायश्चित्तंशतंजप्त्वातद्दशांशप्रवर्धनं. त्यजेद्दशांशन्यूनंप्रायश्चित्तक्रमे
णाच. केचिदन्यमिच्छन्तिपूरश्चर्य्यापूर्णमेवेत्. प्रायश्चित्तेशतंजप्त्वापूरश्चर्य्यांपूरश्च
रेत्. टूटितामेरुमूलेतूत्थीशांतस्य चादिशेत् ※ टूटितांचेत्स्वयंमालाप्रायश्चित्तंस
माचरेत्. गजान्तकेसहस्रंतुजपेहोमंसमाचरेत्. पूनःसंग्रथनंकृत्वाप्राणास्मापूर्वकं
. तदामालासिद्धीदास्यान्नान्यथाशंकरंवच ※ अथग्रहमातृकामन्त्रमाह. मंगला
पिंगा(ग)धान्याभ्रामरीभद्रिकातथा. उल्कासिध्यासंकटाचविकटगर्भपालिका. रौद्रेरणक्षेत्र
नचाष्टौजन्माधिष्ठोक्रमादशा. फलंनामानुरूपंस्यादेवोपंचयमाद्व्याः. पिङ्गलायासूर्य्य
जानीमाहाद्याधिकारिका. तुर्य्यावेधंत्रवर्गोस्यरुद्राकूर्य्योश्चसाधके. ब्रह्मवीजंतुस
मुच्चार्य्यपिङ्गलैवैरिवारिणि. प्रसीदफडितिप्रोक्तस्त्रयोग्निशक्तिवर्णकः. दीर्घषट्कं
यूजमूर्द्धवीजेनवषडंगकं. पिंगवर्णांपिंगकेशीपिंगनेत्रीधनुःशरान्. हस्तान्यंदध
तींपद्मांयूगलंतांभजाम्यहं ※ अथपूजाविधिंनक्षेस्वीसामेवतन्त्रतः. जपापुष्पां
दिनिसत्पाधूपोतुग्गुलसंभवा. घृतप्रदीप्तन्नधूरानैवेद्याःपायशादयः. अलंकारास्तथा
रक्तास्तथावस्त्रादिचन्दनं. स्वर्णालंकारशोभांपिसद्यैवरूपश्चकैः. सर्व्वयेत्परमेशा
नीतत्तन्मंत्रैःसहस्त्रशः. मुक्तामणिसमैःपिष्टैःहरिद्रासमलंकृतैः. कृत्वायन्त्रंयथोक्तंतू

Prof. Madhavprasad Lamichhane Collection at Madan Puraskar Pustakalaya, Nepal

CC-0.In Public Domain. Digitization by eGangotri

योगिनीं तत्र पूजयेत् । तत्तन्मन्त्रवर्जप्त्वाविंशद्भिर्लक्षान्नैर्महस्रशः । सप्ताहेन प्रजायेत त्रिविधो नृपतिर्वरः । ततश्चकुण्डेविधिवत्कृत्वाचचतुरस्रकं । अथवाठंडिले शुद्धेस्थंडिले गोमयेनाभूभिः । चतुर्हस्तप्रमाणेनयोजपेत्स्थिरमानसः योगिन्यग्निंसंस्थाप्यकृत्वापूर्वोदिताः क्रियाः । अन्याश्चांदशवारंतु विरूध्यायाः सहस्रधा । विल्वपत्रैस्तत्फलैश्चकमलैर्नागकेशरैः । जुहुयात्पायसान्नेनतथैवफलवस्तुना । सहस्रमथवाप्यर्धं ललंवाकामराड्भवेत् । * अथातः संप्रवक्ष्यामिमध्यदेवीप्रपूजयेत् । इच्छाज्ञानांक्रियांशक्तिं त्रिकोणेषूपपूजयेत् । मन्मथांबंचतदधः बंकोणेषूपयोजयेत् । षडंगंपूजयेत्पश्चाद्वशिन्यादिकंतथा । त्रैलोक्ययोगिनी । द्वाःस्थेभूसुरेलोकेपालाननस्त्राणिपूजयेत् । पूजापकोणेषुमश्चसर्वेषामयमेवहि विशेषः पूनरस्त्रास्त्रेशत्रोच्छेदाभिचारकैः । खड्गचर्म्मधरोमुग्रांध्यायेद्वज्रजधारिणी । गड्गाशनमालीनांवैरिनिग्रहकालिका । लक्षमेकंप्रजप्यादौ जपेद्वृक्षंहितर्पयेत् । सर्वशत्रुविनाशः स्याद्दुःखंनाप्नोतिकुत्रचित् * अथातसंप्रवक्ष्यामिश्चन्द्रमानुश्चसाधनं । मायाद्योवह्निजायान्तोमंगलेमंगलालये । एकादशाक्षोमन्त्रोमंगलायाप्रकीर्तितः । कृत्वाद्वैषडंगानिदीर्घषड्गतथापूजा । ध्यायेद्देवीत्रिनयनां मुद्यदादित्यसंनिभां । दरमेरुभूरवांम्भोजां सिन्दूरसुन्दराधरं । पद्मद्वयंधनूर्बाणान्दधतींभुजपल्लवैः । सगुंजनंमंजुमंजीरंकींचिगुणविराजितां । एवंध्यात्वामहेशानिः पूर्ववत्परिपूजयेत् । ततोलक्षत्रयंजप्त्वातारमायापुरस्सरं । योगिनीक्षेत्रवटुकगणाधिपबलिहरेत् । सर्वासामेवपूजान्तेमङ्गलैवप्रसीदति । योगिन्यस्तुप्रसादार्थंवर्णलक्षंजपेन्मनूं । दूत्योगिन्यानकूल्यार्थंजपेत्संख्यकायुतं । अस्यदक्षप्रवर्धस्यशुभायात्फलस्यच । प्राप्नुयेत्र जपेतांच्चसहस्रंप्रत्यहंजपं । प्रकर्तव्योवरार्थांयावद्दूत्यानुयोगिनी । सक्षायावर्षायद्राकंरोगिणंचलिनंजयेत् । वरमुक्तेनमन्त्रेणयस्यस्त्रीवावरोभवेत् । तस्यपीडा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भ्रामरि

निवृत्तिर्ध्याङ्गणार्णाख्यैर्नगतैर्दिनैः । एवंविधिर्मनौ विज्ञेयः सरस्वत्याः । योगिनीतुल्य फलदावाममार्गस्थदक्षिणे ॐ अथभ्रामरी । अथातसंप्रवक्ष्यामि भ्रौंभ्रामरि प्रेतोक्ताजयतांमे अधीश्वरि । भ्रामयद्वयौषडन्तोमन्त्रोस्याः परिकीर्तितः । पिंगलावत्सर्ध मस्याः सिध्देयंशर्करान्वशः । मन्त्रयित्वा नयामार्गेदक्षादिक्षूच्चसंत्यजेत् । पानसुनाध्रुवेमार्गे मार्गस्थाः सर्वस्वाहि । सर्वेमोहंसमायांतिव्याघ्रासर्पाश्चतस्कराः । शाल्कनोदूरभूयाश्च नित्यमेवंसमाचरेत् । उपानत्कनलेपस्यलिखित्वानामचोद्धरेत् । योजनैकंजपेन्मंत्रंसगुप्तेच्चवसुन्धरां ॐ अथभद्रिका । अथातसंप्रवक्ष्यामि भद्रिकांवृधमातरं ह्रींबीजं तोयभूयोगाज्ञानमादोसमुच्चरेत् । भक्तिकेप्रेममः भद्रंदेहीनिचपदंपूनः वदेच्चपरम द्वयंशिनाशयेद्वितयंततः । स्वाहान्तोजिनवर्णायंभद्रिकायामनूत्तमः । षड्दीर्घबीजेन्म षडंङ्गं विधिरीरितः । मङ्गलाच्छ्रूभानांत्याधानंउद्धरदायिनी । पिङ्गलावद्वसमु द्दिष्टंजपाद्यंप्रोक्तवर्त्मना ॐ अथधान्या । अथातसंप्रवक्ष्यांतं धान्याख्यांगुरुमातरं । श्रीधनदेसमुच्चार्य्यधनेस्वाहाष्टवर्णकः । षट्दीर्घाद्यबीजेन षडंगंविधिरीरितः । नास्तिधान्यासमाकींचिद्दिहलोकेफलप्रदा । पूरश्चर्य्यांत्रयंकुर्य्यात्प्राज्यमाज्यंगपात कं । संस्तंत्यधान्यादतेधन्यत्वंसाधकायतु । बृहस्पतीश्वरान्पश्चाकाश्यांधान्यंविलो कयेत् । पूरश्चर्य्यानरंकृत्वावंशोधन्यःप्रजायते ॐ अथसिद्धा । अथातसंप्रवक्ष्यामिसिद्धासुक्रस्यमातरं । हूंसिध्देप्रेतसर्वेमानस्यमूक्तासाधयतद्वयं । हृदयान्तोमन्त्रवर्णः सिध्दाद्यामनूरीरितः । बीजेनैवषडंगानिजपाद्यंप्रोक्तवेच्चरेत् । नास्तिसिध्दापासकानां कर्मसिध्दिस्तुकुत्रचित् । उपासकायसिध्दायायेनाम्नायेनजायते । तस्मान्मायनदेवीनांपाके स्याः सर्वमेवहि । षट्कर्मासिध्दतेतस्यमनोराशधनंविना ॐ अथउल्काया । अथातसंप्रव क्ष्यामिचोल्कामंत्रस्यमातरं । हूंभमःरोगंनाशयभंजकायेदग्राक्षरी । सर्वरोगापहोमन्त्रोभक्ते नात्सप्तयमतः । उल्कामन्त्रोयस्यसिध्देमहारत्नंदिने [illegible] तायांमहामायां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu Nepal

CC-0.In Public Domain. Digitization by eGangotri

महिषंलक्षणांन्वितं · उल्का प्रीत्यैतमुत्सृज्य नगरे भ्रामयेत्पुनः · नानावाद्यैः परिवृतं वस्त्रादि
भिरलंकृतं · उत्सृजेत्तं पमशोयामूपद्रवशमोभवेत् ※ अथसंकटा · अथातसंप्रवक्षामिसं
कटांराहूमातरं · ह्रीँसंकटं चरोमं परमं नाशयद्वयं · षोडशार्णस्तुमन्त्रोयंसर्वदुःखापनोदयः
कारागृहेजपेल्लक्षंबन्धमोक्षप्रजायते · वीरेश्वरादूदक्काश्यांसंकटायत्रसंस्थिता · तत्रषोडशलक्षा
णिजप्त्वाहोमस्तुदूर्वया · तस्यासिद्धोभवेन्मंत्रंस्तन्मुखाद्यादिनिःश्चरेत् · अमूकस्यामूकं कष्टं
गतंतद्गतमेवहि ※ अथकेतू · अथातसंप्रवक्षामि विकटांकेतुमातरं · तारौनभोभगवतिः
विकटेवीरपालिके · प्रसीदयुगलंमन्त्रःप्रकृत्यर्णःप्रकीर्तितः · काश्यांवीरेश्वरासन्नाप
श्चिमेविकटास्थिता · तत्रमन्त्रमिमंजप्त्वागहतस्ताश्चवालूकाः · उदरंचापिवंध्यात्वाप्रणवं
त्यास्तथाशिरः · पात्रादिभिस्त्यक्तवालान्तथामातृविवर्जितान् · साधकस्यकरंपृष्ट्वा
वीरोगान्चिरजीविनः ※ अमूक्त्यूपायमाह · देव्युवाच · क्वचिद्दक्षंक्वचिद्वामंक्वचित्सौ
रंचशांभवं · उर्ध्वाम्नायंक्वचिद्वामंक्वचित्सौरंचशांभवं · उर्ध्वाम्नायंक्वचिद्दक्षमुत्तरंपश्चि
मंक्वचित् · अधआंनायकंचापिगाणपत्यंचवेष्टवं · पारमिकक्वचिद्वौध्दापाखंडंचक्वचि
त्क्वचित् · द्वीपधर्म्मात्खंडधर्म्मांकूलधर्म्माक्वचित्क्वचित् · कालधर्म्मावृत्तिधर्म्माजातिध
र्म्माक्वचित्क्वचित् · तत्तत्प्रकरणेस्तौषिक्वचिन्निन्दसितंपुनः · तंत्रोक्तममिदंतन्त्रंप्रशस्तश्चेत्सु
रोपरि · तदातत्वंममब्रूहिनिसंदेहात्सदाकुरु ※ शिवउवाच · अहोकालस्यमाहात्म्यंतंत्रेतंत्रे
त्वयापुनः · पृच्छ्यतेतत्तदाधिक्यंसाहंकारंब्रवीमितत् · वेलेयंसात्विकीकाचिज्जाताका
लस्ययस्त्वया · उपकारायसर्वेषांपृष्टंतत्वंब्रवीमितत् · यथावेदेतथालोकेयथाकालं
प्रजायते · यथाब्रह्मांडगोलोयंलिप्यतेयत्रमध्यतः · सत्यंतत्रचपश्यत्वंपतितंकियदं
तरं · तथाचानाहतःशब्दोनरेक्षप्यःप्रवर्तते · सनित्योपिपनेत्कर्णोनकदापिपतेत्क
र्णो · संदेहनकदापिमूमूर्षतः · महापुरुषकालस्यतथावेदध्वनिस्मृतः · कलेर्दश
सहस्राणियदावर्षाणियांचित · वेदानारायणःसाक्षात्कालावयवजन्तुभिः · नशू

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यते तदादेशिज्ञेयकालः समागतः । वाङ्मनसातीतपदार्थद्वितीयाद्वैतश्रोत्पत्तिस्थिरा
वेदभिन्नानिशास्त्राणितथाजानन्तुदेवताः । यस्यशास्त्रलोकेस्मिंपचलायाव
दात्मभिः । तावत्तन्मार्गिणांसोऽयंवेदमार्गाजकूंठितः । तस्यातन्मार्गकर्तृ
रःशिष्यात्तन्मन्त्रदायिनः । तानानयतिस्वमार्गेयतस्तावत्सुखंभवेत् । नृणां
ज्ञानंयथाबह्वीरिन्द्रियैःपरिजायते । तथाखंडंवेदार्थज्ञानंभवतिनिश्चितं । क
वंरेचयेत्वशनैः शनैः । भूयोभूयःक्रमात्तत्र अभ्यासेनसमाचरेत । एवंमभ्यासतःपूंसो
दाङ्गशोधमः । मध्यमः कल्पसंयूक्तो मुक्तित्यागोपरात्ततः । एवंक्रमेणनाडीनांशोध
नंकल्पयेद्बुधः । ततोगुह्येवामपादपार्श्वत्रविनिवेशयेत । तस्योपरिमहादेवीदक्ष
पादंनिधापयेत । ऋजुकायशिरोग्रिवः काकचंच्यूपुटेनच आकारेणबहिर्वायूंजठरेप
रिपूरयेत । अंगुलीभिर्दृढंबध्वा मन्याभ्यांवेदनंदृढं । बध्वातधारणंनसाएकत्वंतं
मनूस्मरेत । धारयेत्सयंसम्यक् योगीसंशोधितदृशः । नाड्यसंजायतेसम्यक्क्रमा

Digitized by Mahavir Prasad Jamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दभ्याशतः सनैः । मत्तभृङ्गाङ्गनागीत सदृशः प्रथमध्वनिः । वंशिकाश्यादिना पूर्णवंशध्वनि
निनिभोपरः । घंटारवसमेप्रश्चाद्घ्येन मेघस्तलोपरः । ततसूप्तादिशदृशीं कूण्डलीपरदेवतां
। सुषुम्नासूखमादृष्टवेष्टितां परिचिन्तयेत् । कान्तावस्थितयोन्यास्तु द्रुमन्तं रक्तवर्णकं । का
मांशिवस्वरूपं च चिन्तयेत्साधकोत्तमः । अनाहतततोध्यायेत्त्रीन्दुलां हंसमाश्रिता । प्रदी
पकलिकाकारं कूण्डल्यासंश्वरूपिणी । चित्कलया कूण्डलीनीं तेजोरूपं जगन्मयी । हंसे
न मनुना देवी ब्रह्मपद्मं नयत्सुनी । षट्चक्रसन्धिमार्गेण सुषुम्नावर्त्मना तथा । उर्द्धं लये कूण्ड
लीनीं जीवात्मसहितां परां । आधारास्थि उत्थानात् ब्रह्मणानि शनैः शनैः । तेनैव मयूखानि च
मानयानि च
ज्योती
द्यात्मूर्द्धं मूखानि च । भावयेत्संविकोयोगी ज्ञानमार्गेण चेतसा । आधारचक्रपद्मं वै वेदपत्रं
सुशोभनं । स्वाधिष्ठाने लिङ्गमूले षट्दलं परिचिन्तये । मणिपूरनाभिमूले दिग्दलं सूरसुन्दरी
। अनाहतहृदि ध्यायेद्द्वादशान्तं सुलक्षणं । विशुद्धाख्यो महाचक्रे षोडषेच्छदपङ्कजं । भ्रुवो
र्मध्ये महाचक्रे आज्ञाख्ये द्विदलेस्तथा । आधारादीनि चक्राणि भित्वा तेजस्वरूपिणी । ब्र
ह्मपद्मं नयेद्देवीं कूण्डलीपरदेवतां । डाकिनी राकिणी चैव लाकिणी शाकिणी तथा । काकि
णी हाकिणी चैव एता षट्चक्रदेवता । एतानि योज्य षट्चक्रे ब्रह्मत्वेन महेश्वरी । ब्रह्मरन्ध्रे
सहस्रारे कूण्डलीस्थापयेद्बुधः । परमात्मा च तत्रैव ब्रह्मपद्मे स्थितप्रभू । कूण्डलीशक्तिरूपा
च परमात्मा शिवस्वयं । क्रियासमभिहारेण तयोरैक्यं विभावयेत् । पृथिव्यादिनि तत्वानि
जीवभावे विलीनयेत् । तमेव परमेशानी चन्द्रमंडलमेव च । अमृतस्य परं स्थानं ज्ञानपीयूष
सागरं । तस्मा विनिर्गतां धारां षट्चक्रेषु विचिन्तयेत् । तत्संसर्गाच चक्राणि तेजोरूपा चिन्त
येत् । सहस्रारे महापद्मे अमृतं विनिवेषयेत् । तेनामृतेन संप्राप्य कूण्डलीपरदेवतां । ते
नैव वर्त्मना देवी स्वस्थानमानयेत्पुनः । सो हि नित्यात्मना ज्ञानं भावयेत्साधकोत्तमं । षट्
चक्रदेवताम्भास्तु लोलीभूतामृतेन च । चिन्तयित्वा महापद्मे स्वस्वस्थाने निवेशयेत् । वैष्णवस्य
श्च शाक्तस्य शौरेभ्यश्च वरानने । शिवशक्त्या समायोगा महाप्रज्ञा प्रजायते । तत्रस्तु चित्रिणि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नाडयामक्षमालांविभावयेत् । पञ्चाशत्मातृकापूराचमाद्यकाचसरस्वती । अकारादिक्षकारान्ता अक्षमालाप्रकीर्तिता । क्षकारमेरुरुपन्नुलंघयेनकदाचन । अनुलोमविलोमाभ्यक्ष प्रत्येकवर्णमालया । आदिलाद्यनाद्यकाराक्रमेणापरमेश्वरी । अष्टोत्तरशतंमूलमन्त्रंज्ञानेन संजपेत् । मनसाचमनूंजप्त्वामन्त्रसिद्धोभवेद्ध्रुवं । अष्टोत्तरशतंजापे आदौक्लींवंसमाचरेत् । अष्टवारंजपंयत्नात्पुनः क्लींवंपरित्यजेत् । वर्गाणांमपवर्गेणाअष्टवारंजपेत्सधीः । अकचटतपयशाइत्येवंवाष्टवर्गतः । संविद्यं वर्णसंस्मृत्यपंचान्मंत्रचसंस्मरेत् । इतीमेकथितंदेविमूडालक्षराभूत्तमं । अनयामूडयादेविसुप्तादिदोषज्ञानंयेत् । मासमेकंजपेन्मन्त्रहविष्याशिजितेन्द्रियः । योनिप्राशक्तिरूपायतत्रनाम्निमहेश्वरी । तत्रदिवानशृन्हनिपूजाहोमादिकंतुयत् । शक्तिहीनंगुरुंप्राप्यशिष्यशक्तिंकुतःप्रिये । मूलेच्छिन्नद्रुधेदेविकुतःपुष्पफलादिकं । मनोन्येशक्तिवोन्येशक्तिरन्यत्रपार्वती । नसिध्यन्तिवरारोहेकल्पकोटिशतैरपि । योनिमूडामहामूडाज्ञातव्यायत्नतःसुधी । अज्ञात्वाशक्तरंदेविभस्मीभवतिकाष्ठवत् । एषामूडामयागुप्तातन्त्रादियामलेपिच । साम्प्रतंकथितंदेविश्रृणुपार्वतिकन्यके ॥ इतिमन्त्रमुक्तावल्यांशिवेदव्यासम्वादेयोनिमूडालक्षरांसम्पूर्णं ॥ इतिश्रीरहस्येसर्वधर्मसारेउनत्रिंशपटलः २९ ॥ अथदशमहाविद्यानांकवचमाह । तन्त्रादौश्यामायां । श्रीभैरव्युवाच । कालीपूजाश्रुतानाथभावाश्चत्रिविधाः प्रभो । इदानीश्रोतुमिच्छामिकवचंपूर्वसूचितं । त्वमेकशरणंनाथत्राहिमांदुःखसंकटात् ॥ श्रीभैरवउवाच । रहस्यंश्रृणुवक्ष्यामिभैरवीप्राणवल्लभे । श्रीजगन्मङ्गलंनामकवचंमन्त्रविग्रहं । पठेद्धारयित्वेदंत्रैलोक्यंमोहयेत्क्षणात् । नारायणोपियद्धृत्वानारीभूत्वामहेश्वरं । योगेशक्षोभमूनर्यः क्षुब्धत्वाचरघुद्वहः । वरदप्तारुजघ्नानंरावणादिनिशाचरान् । यस्यप्रसादादीशोपित्रैलोक्यत्रैलोक्यनिजयीप्रभुः । चिनाधिपकुबेरोपिसूरेशोभूच्छचीपतिः । एवंहिसकलादेव्याः सर्वसिद्धिप्रदायिके । श्रीत्रिभंगाई ११ ल्यास्य कवचस्य ऋषिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शिवः । छन्दो अनुष्टुप्देवता च कालिका दक्षिणेरिता । जगतां मोहने दृष्टविजये भुक्तिमुक्तिषु ।
योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः । शिरो मे कालिका पातु क्रीँकारैकाक्षरी परा । क्रीँक्रीँ
क्रीँ मे ललाटे च कालिका खड्गधारिणी । हूँहूँ पातु नेत्रयुग्मं ह्रीँह्रीँ पातु श्रुतिमम: । दक्षिणे कालि
का पातु घ्राणयुग्मं महेश्वरी । क्रीँक्रीँक्रीँ रसनां पातु हूँहूँ पातु कपोलकं । वदनं सकलं पातु ह्रीँ
ह्रीँ स्वाहास्वरूपिणी । द्वाविंशत्यक्षरी स्कंधौ महाविद्या सुखप्रदा । खड्गमुण्डधरा काली सर्वाङ्ग
मभिभावतु । क्रीँहूँह्रीँ त्र्यक्षरी पातु चामुण्डा हृदयं मम । ऐँहूँ ॐ ऐँ स्तनद्वंद्वं ह्रीँ फट् स्वाहा कक्
त्स्थलं । अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका । क्रीँक्रीँहूँहूँह्रीँह्रीँ — पातु षडक्षरी म
मः । ह्रीँ नाभिं मध्यदेशं च: दक्षिणे कालिकेवतु । ह्रीँ स्वाहा पातु पृष्ठं तु कालिका सा: दशाक्षरी । हूँहूँ
दक्षिणकालिके हूँहूँ पातु कटिद्वयं । काली दशाक्षरी विद्या स्वाहान्ता सौरुयुग्मकं । ॐ ह्रीँह्रीँ
मे स्वाहा पातु कालिका जानूनी प्रदा । काली हृन्नाम विद्येयं चतुर्वर्ग फलप्रदा । क्रीँहूँक्रीँ पातु
गुल्फं च दक्षिणे कालिकेवतु । ह्रीँहूँह्रीँ स्वाहा पातु चतुर्दशाक्षरी मम: । खड्गमुण्डधरा
काली वरदाभयहारिणी । विद्याभिः सकलाभिश्च सर्वाङ्गमभितोऽवतु । काली कपा
लिनी कुल्ला कुरुकुल्ला विरोधिनी । विप्रा चिन्त्या तथा चोग्रा प्रभा दीप्ता घनत्विष ।
नीला घना बलाका च मात्रा मुद्रा मिता च नां । एता: सर्वा खड्गधरा मुण्डमाला विभूषणा ।
रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा । माहेश्वरी च चामुण्डा कौमारी चाप
राजिता । वाराही नारसिंही च सर्वाश्चामितभूषणा । रक्षन्तु आयुधैर्दिक्षु विदिक्षु च य
था तथा । इति ते कथितं दिव्यं कवचं परमाद्भुतं । श्रीजगन्मङ्गलं नाम महाविद्यौघवि
ग्रहं । त्रैलोक्यकवचं ब्रह्म कवचं मन्मुखोदितं । गुरुपूजां विधायाथ विधिवत् प्रपठेत्त
तः । कवचं त्रिः सकृत्वापि यावद्वा पंचधा: पुनः । एतच्छतार्धमातृभ्य त्रैलोक्यविजयी भवेत् ।
पुष्पाञ्जलीकालिकायै मूलेनैव पठेत्सकृत् । शतवर्षसहस्राणां पूजाया फलमाप्नुयात् । भू
र्जे विलिखितो चैव स्वर्णस्थं धारयेद्यदि । शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद्यदि । त्रैलो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ॐमोहयेत्क्रोधात्रैलोक्यंचूर्णयेत्क्षणात् । पूत्रवान्धनवान्श्रीमान्नान्यवीद्यानिधिर्भवेत्॥
ब्रह्मास्यादिनिशस्त्राणीतद्गात्रस्पर्शनाद्भवेत् । नाशयानियानारीवन्ध्यावामृतपूत्रिणी-कंठे
वावामबाहौवाकवचस्यचधारणात् । बहुपत्याजीववत्साभवत्येवनसंशयः । नदेयंपरशिष्ये
विशेषतः । शिष्येभ्योभक्तियुक्तेभ्योनान्यथाम्ब्रूयात्पुमान्भवेत् । स्पर्धांमूद्धत्यकमलावाग्देवीमन्दिरेमुखे । यो
त्रा
त्रानांनियमास्थायनिकसेत्येवनिश्चितं । इदंकवचमज्ञात्वायोभजेद्दक्षकालिकां । शतल
क्षप्रजप्तापित्स्यविद्यानसिद्धति । नशस्त्रघातमाप्नोतिसोचिरान्मृत्युमाप्नुयात् । तस्मात्सर्व
प्रयत्नेनएतद्धर्म्मपुरश्चरं । संजपात्सिध्दिदाकालीसाधकायभवेद्ध्रुवं ॐ इतिश्रीभैरवभै
रवीसंवादे भैरवीतन्त्रेश्यामाकवचं संपूर्णं ॐ अथतारकवचंमाह । पुराकैलासशिखरे
शरीर
तारप्रपृच्छशंकरः । गुप्तभावेनदेवेशिकथयत्यतुमादरं । केनोपायेनसहसासद्धंभवेत्
श्री
। कथंवासिध्दिरतुलातवमन्त्रविदांप्रिये ॐ ताराउवाच । अतिगुह्यतमंहोतन्निःस्तंमूखपं
कजं । इदंरहस्यपरमंकथयास्मित्वयिप्रभो । श्रूयतांसावधानेनकवचंमन्मूखात्स्तं । मधु
कैटभयोर्युध्दकथितंपद्मजन्मना । तत्प्रभावात्तूदेवेशनाशंविघ्नानयाच्छति । भवेत्सू
कथितंपूर्वंतन्मस्मरसिमालया । उध्दृतंसारभूतानांकवचंयोगिनीमते । नकस्मैचि
त्प्रवक्तव्यंनप्रकाश्यंकथंचनः । शपथंकुरुतेदेविंयदिस्नेहोस्तिमांप्रति । श्रूयतांसाव
धानेनकवचंसारसंग्रहं । सत्यं सत्यंपूनःसत्यंसत्यंसत्यंपूनःपूनः । कवचेनाविना
देवयोमामर्चयतिक्षणात् । तमश्नामिमहेशानयोगिनीभिःसूनिश्चितं ॐ ब्रह्मा
विष्णुमहेशानांबीजंरक्तनुमूलकं । तदूर्ध्वंशक्तिबीजंतुलिङ्गंरक्षतुयत्नतः । भगिपूरं
सदापातुवधूबीजंविशेषतः । अनाहतवर्म्मबीजंपातुमेसर्वसर्वतः । अस्त्रंशीसर्व
दापातूविशुध्दंकण्ठभूषितं । शेषस्तुपातुमेनित्यंमायास्थानंद्विपत्रकं । शीर्षंष्या
नुताराजयाजयापातुसदाननं । नीलःसरस्वतीपातुवधूबीजंसदैवाहि । स्तनद्वयंस
दापातुकूर्चंविघ्नविनाशनं । एकवंशेसदापातुवधूबीजंवीरसाम्बती । रसनांशंस
29

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दापातु सरस्वतीप्रयत्नतः । रतीःपातु सदाबीजं प्रीतिर्मे वदनं सदा । कीर्त्तिः कीर्त्तिं सदापातु शा
न्तिः शान्तिं सदावतु । पुष्टिर्मे पातु पुष्टं च तुष्टिं तुष्टिः सदावतु । वैरोचनः पातु शंखं शंखपू
र्वस्तथैव च । पाण्डुलोमे सदापातु पातु नित्यं च सर्वसः । पद्मनाभः सदापातु नाभिमे दशपत्रकं
। असिताभः पातु लिंगं नामकः पातु चक्षुषी । मामको मे तथा हस्तौ ग्रीवां मे पातु पांडुरः ।
तद्रुद्र पातु हृदयं पृष्ठं पद्मांतको मम । पार्श्वद्वन्द्वं सदापातु यमान्तकनरान्तको । चरणौ
मे पातु नित्यं विघ्नान्तक सदाद्वयः । तारमे पातु सततं मष्टांगं परमेश्वरी । इदं तु कवचं देव
कथितं मन्मुखात्सुतं । प्रमादाद्यदि देवेश यत्र क्वग्रप्रकाशते । योगिनीभिस्तदा हन्तु स्वयं
च वधकारिणी । दध्यात्छान्ताय शिष्याय तन्त्रमन्त्रयुताय च । गुरुभक्तियुन्मचैव त
दा सिद्धिरनुत्तमा । रहस्यकथितं सर्वं मनन्तफलदायकं । गोपितव्यं त्वया देव न प्रका
स्य कदाचनः ※ इति श्रीयोगिनितन्त्रोक्तैकजटाकवचं समाप्तः [※] अथाच्छिन्नमस्ताक
वचं ※ भैरव्युवाच । कथिताच्छिन्नमस्ताया या विद्यायाः सुगोपिता । त्वया नाथेन जी
वेश श्रुता च गदिता मया । इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं । त्रैलोक्यविजयं नाम
कृपया कथ्यतां विभो ※ श्रीभैरव उवाच । शृणु देवि प्रवक्ष्यामि सर्वदेवनमस्कृतं । त्रै
लोक्यविजयं नाम कवचं सर्वमोहनं । सर्वविद्यामयं साक्षात्सुरासुरजयप्रदं । धार
णात्पवनादिश त्रैलोक्यविजयी भुवि । ब्रह्मा नारायणो रुद्रधारणात्पवनाद्यतः । कर्ता या
ता च संहर्ता भुवनानां सुरेश्वरी । न देयं परशिष्येभ्यो भक्तेभ्यश्च विशेषतः । देयं शिष्याय
भक्ताय प्राणेभ्योप्यधिकाय च । देव्याश्च छिन्नमस्ताया कवचस्य च भैरवः । ऋषिः सं
म्राट् विराट् च्छंदो देवता छिन्नमस्तया । त्रैलोक्यविजये मुक्तो विनियोगः प्रकीर्तिताः ।
हूँकारो मे शिरः पातु छिन्नमस्ता नलप्रभा । ह्रीँ हूँ ऐँ श्वक्षरी पातु भालं रक्तदीगंबरी । श्रीँ ह्रीँ हूँ ऐँ
दृशौ पातु मूण्डकर्त्रीधरापि सा । सा विद्या प्रणवाद्यंता शुचियुग्मं सदावतु । वज्रवैरोचनी हूँ
हूँ फट् स्वाहा वधूवादिकः । प्राणं पातु छिन्नमस्ता स्वमूण्डकर्त्रीधारिणी । श्रीमायां कूर्च्चे

Prof. Madhav Prasad Lamishhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वाग्वीजे वज्रवैरोचनीयहूँ । हूँफट्स्वाहा महाविद्याबोऽग्नीवृक्षमूरिपारि । स्वपार्श्वेवालिकाभ्यांस्वा
मूर्धानंविकीमूदा । वदनंसर्वदापातु छिन्नमस्तासशक्तिका । मूद्राकविधारक्ता साधकाभीष्ट
दायिनी । वगिडनीडाकिनीयूक्ता सापिभामभितोवतु । रमाद्या पातुजिह्वांचन्नज्जाया पातुकं
ठकं । पूर्वोद्याहृदयं पातु वाग्मद्ध्यस्तनयुग्मकं । रमयापूटितविद्या पार्श्वेपातु सूरेश्वरी । मायया पू
टिता पातु नाभिदेशंदिगम्बरि । कूर्चेनपूटितादेवि पृष्ठदेशेसदावतु । वाग्वीजं पूटिताचैवमध्यं
पातुसशक्तिक । इश्वरीकूर्चवाग्वीजेवज्रवैरोचनीयहूँ । फट्स्वाहेतिमहाविद्याकोटिसूर्य्यसम
प्रभा । छिन्नमस्तासदापायाइडयूग्मंसशक्तिका । हूँहूँहूँवर्णरूपीजानूं श्रींहूँहूँडाकिनीपदं
। सर्वविद्यास्थितानित्यासर्वांगंमेसदावतु । नैरित्यांसततंपातु भैरवीपाश्चिमेवतु । इन्द्राक्षीपातु
वायव्येसितांगीपातुचोत्तरे । संहारिणीसदापातु शिवकोणेभवर्त्रिका । इत्येवंसकयः पातुदिविदि
क्षूसकर्त्रिकाः । क्रींक्रींक्रींमांपातुपूर्वेहूँहूँमांपातुपावके । हींहींमांदक्षिणेकालिकेवतु । क्रीं
क्रींक्रींचैवनैऋत्यांहूँहूँमांपश्चिमेवतु । हींहींचपातुभद्रकोणेस्वाहापातुसदाभरे । महाकालिखड्ग
हस्ताद्रक्षकोणेसदावतु । ताराभायावधूकूर्चफट्कारोयंमहामनू । खड्गकर्तृधरातारार्धदेशं
सदावतु । ह्रींह्रींहूँचैवपातालेपातुनीलसरस्वती । इतीतेकथितंदेव्याः कवचंमन्त्रविग्रहं । यद्
ज्ञात्वापवनाद्भीमः क्रोधाख्यभैरवः प्रभुः । सूरासूरमुनिन्द्राणांकर्त्तृहर्त्तृभवत्स्वयं । यस्याज्ञया
मधूमतीयानिसासाधकानिकं । भूतिन्याद्याश्रयस्तिन्योडाकिन्याद्याश्चरचेचराः । आज्ञा
कूर्वीनितास्तस्यछिन्नादेव्याः प्रसादतः । अन्तदेवपरब्रह्मकवचंतेन्मूखोदितं । देविमभ्यर्चयं
धाजैः मूलेनैवपवेत्सकृत् । संवत्सरकृतायास्तु पूजायाः फलमाप्नूयात् । भूर्जेपित्तिखितं
चैतत्गुटिकांचनसंस्थितां । धारयेद्दक्षिणेबाहौ कंठेवायदिभाग्यतः । सर्वैश्वर्य्ययूतोभू
त्वात्रैलोक्यंवसमानयेत् । तस्यगृहेवसेल्लक्ष्मीर्धारणांचवदनीवुजे । ब्रह्मास्त्रादीनिशस्त्रा
णितद्गात्रयानिभंगनां । इदंकवचमज्ञात्वायोजपेच्छिन्नमस्तकां । सोपिशस्त्रप्रहारेण
मृत्यूं प्राप्नोतिसत्वरं । [illegible] त्रैलोक्यविजयं

Prof. Madhav Prasad Ghimire Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नाम कवचसमाप्त ※ अथमहात्रिपुरसुन्दरीकवचमाह । श्रीदेव्युवाच । भगवन्देवदेवेशलोकानुग्रहकारका नोहितकाभ्यया । त्वत्प्रशादान्महादेवश्रुत्वामन्त्रास्त्वनेकधा । साधनंविविधंदेवकीलकोधारणंतथा । शापादिदूषणोद्धारःश्रुतस्तत्वमयाप्रभो । राजराजेश्वरीदेव्याःकवचंसूचितंमयि । ओतुभिन्नमितन्तन्तु कथयस्वमयिप्रभो । ※ ईश्वरउवाच । लक्षवारसहस्राणिवारितासिपुनः पुनः । स्नेहभावान्महादेविपृच्छसित्वंमयिप्रिये । अत्यन्तगुप्तंकवचंसर्वकामफलप्रदं । प्रीतयेतवदेवेशीकथयामिवरानने । अस्यश्रीषोडशीविद्याकवचस्यऋषिःस्मृतः महादेवश्छन्दउदाहृतं । राजराजेश्वरीदेवीदेवतापरिकीर्तिता । सर्वार्थसाधनेदेविविनियोगःप्रकीर्तितः । पूर्वेमां भैरवीपातुवह्निमांपातुदक्षिणे । मालिनीपश्चिमेपातुत्रासिनीमुत्तरेवतु । ऊर्ध्वंपातुमहादेवीमहात्रिपुरसुन्दरी । अधस्तापातुदेवेशीपातालतलवासिनी । आधारेवाग्भवःपातुकामराजस्तथाहृदी । डामरपातुमांनित्यंमस्तकेसर्वकामदः । ब्रह्मरन्ध्रेसर्वगात्रेछिद्रस्थानेसर्वदा । महाविद्याभगवतीपातुमांपरमेश्वरी । ऐंक्लींललाटेमांपातुपायात्हींक्रींभ्रूंसश्चनेत्रयोः । नासायांकर्णयोश्चैव दाँदेंदीँचिवूके तथा । सौंःपातुगलेहृदयेममसः ईंनाभिदेशके । कलह्रींघ्रींगुह्यकेदेशेसमहीं पातुपादयोः । सहौंमांपातुसर्वांगसक्रौंपातुमेसन्धिषु । जलेस्थलेन्तथाकाशेदिक्षुराजगृहेन्तथा । हूंवैंमांचरिताःपातुसहौंमक्रींप्रभोभवं । हंसश्चपाशान्महादेविपरंनिष्कलदेवता । बीजयामङ्गलाद्यैकल्याणीभगमालिनी । शान्वाचंमालिनीविद्याःसर्वदापातुमांशिवा । इत्येवंकवचंदेविदेवानांमपिदुर्लभं । तवप्रीत्यामयाख्यातंगोपनीयंप्रयत्नतः । इदंरहस्यंपरमंगुह्यागुह्यतरंप्रिये । धनधान्ययशआयुभोगमोक्षप्रदंशुभं । दुःस्वप्ननाशनंपूसांनरनारीवशंकरं । आकर्षणकरंदेविस्तम्भोच्चाटकरंशिवं । इदंकवचमज्ञात्वाराजराजेश्वरीशिवां । योर्चयेत्तयोगिनीवृन्दैःभक्षणात्नाशसंशयः । नतस्यमन्त्रासिद्धिस्यात्कदाचिदपिशांकरि । इहलोकेचदारिद्र्यंरोगदुःखभयानिच । परत्रनरकंगत्वापशुयोनीमवाप्नुयात । तस्मादेतत्प्रयत्नेनगोपनीयंकौलिभिर्नरैः । मद्भक्तायनिजेतायदं कवचंसूपुत्राय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूजाविधौश्चपुरतोविधिनायथेतयः - सौभाग्यभागललितानि शुभानिभुक्तादेव्याः पदं भजतितत्पुनरन्तकाले - इतिकूलान्वसंहितायांश्रीमहात्रिपुरसुन्दरीषोडशीकवचंसंपूर्णं ॥ अथत्रिपुरभैरव्यैकवच - श्रीपार्वत्युवाच - देवदेवमहादेवसर्वशास्त्रविशारदः - कृपांकुरुजगन्नाथधर्मज्ञोसिमहामते - सुन्दरीचपुराप्रोक्ताविद्यास्त्रीपरपूर्विका - तस्यास्तुकवचंदिव्यंमह्यंकथयतत्वतः - तस्यास्तद्वचनंश्रुत्वाजगादजगदीश्वरः - अद्भुतंकवचंदेव्याः सुन्दर्यादिविरूपिवै ॥ श्रीमहादेवउवाच - कथयामिमहाविद्याकवचंसर्वदुर्लभं - शृणुष्वत्वंचविधिनाश्रुत्वागोप्यंतयेपितत् - यस्याःप्रसादात्सकलंविभर्म्मिभुवनत्रयं - यस्याःसर्वसमुत्पन्नंयस्यामद्यापितिष्ठति - मातापिताजगन्मान्याजगद्रक्षास्वरूपिणी - सिध्दिदात्रीचसिध्दास्यादसिध्दादुष्टजन्तुषूः - सर्वभूतहितकरीसर्वभूतस्वरूपिणी - ककारःपातुमांदेवीकामिनीकामदायिनी - ऐंकारीपातुमांदेवीमूलाधारस्वरूपिणी - इकारीपातुमांदवीरविसर्वस्तुस्वःप्रदा - लकारीपातुमांदेवीइन्द्राणीवरवल्लभा - ह्रींकारीपातुमांदविसर्वत्रशस्तुसुन्दरी - एतैवर्णैमहामोहाशाम्भवीपातुमस्तके - कपालेपातुमांदेवीसर्वाणिहरगेहिणि - मकारेपातुमांदेवीसर्वपापप्रणासिनी - ककारेपातुमांदेवीकामरूपधरासदा - ककारेपातुमांदेवीशम्बरारिप्रियासदा - लकारीपातुमांदेवीधराधरणिरुधृक - ह्रींकारीपातुमांदेवीशंकरार्धशरीरिणी - एतैर्वर्णैम्महामायापातुशक्तिस्वरूपिणि - वाग्भवंसप्तकंपातुवदनंकामराजिका - शक्तिस्वरूपिणीपातुहृदयंमन्त्रसिध्दिदा - सुन्दरीसर्वदापातुसुन्दरीपरिरक्षतु - रक्तवर्णासदापातुसुन्दरीसर्वदायिनी - नानालंकारसंयुक्तासुन्दरीपातुसर्वदा - सर्वाङ्गसुन्दरीपातुसर्वत्रशिवदायिनी - जगदाल्हादजननीशन्तुरूपावमांसदा - सर्वमन्त्रमयीपातुसर्वसौभाग्यदायिनी - दक्षिणामूर्त्तिमांपातुऋषिःसर्वत्रमस्तके - पङ्क्तिःछंदस्वरूपेचमुखेपातुसुरेश्वरीं - गन्धाष्टकात्मिकापातुहृदयंशन्तरीसदा - सर्वसंमोहिनीपातुसंक्षोभिणीसदाक्तु - सर्वविद्राविणीपातुसर्वाकर्षणकारिणि - सर्वाह्लादकरीपातुसं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

र्घसंक्षोभिनीसदा . सर्वसिद्धिप्रदापातु सर्वाकर्षणकारिणी . भोभिणी सर्वदापातु वशिणीमांसदा
वतु . आकर्षिणीसदापातु संभोहिनीसदावतु . रतिदेवीसदापातु लगामांसर्वदावतु . महेश्वरि
सदापातु कौमारीसर्वदावतु . सर्वाल्हादनकालीमांपातु सर्ववशंकरी . क्षेमंकरीसदापातु सर्वाङ्गसू
न्दरींसदा . सर्वाङ्गयुवतीपातु सर्वसौभाग्यदायिनी - वाग्देवीसर्वदापातु वाशिनीसर्वदावतु .
वाशिनीसर्वदापातु महासिद्धिप्रदासदा . सर्वविद्राविणीपातु गणनाथःसदावतु . दूर्गादेवीसदापा
तु वटुकःसर्वदावतु . क्षेत्रपालःसदापातु पातु चाधारशक्तिका . अनन्तःसर्वदापातु वराहःसर्व
दावतु . पृथिवीसर्वदापातु स्वर्णसिंहासनंतथा . रक्तामृतंचसततं पातुमांसर्वकालतः . सुधार्ण
वःसदापातु कल्पवृक्षसदावतु . श्वेतछत्रंसदापातु रक्तदीपसदावतु . नन्दनाद्यानसततं पातुमां
सर्वसिद्धये . दिक्पालःसदापातु इन्द्राद्यासकलास्तथा . वाहनानिसदापातु अस्त्राणिपातुस
र्वदा . सश्राणिसर्वदापातु योगिन्यःपातुसर्वदा . सिद्ध्यैःपातु सदादेवीसर्वसिद्धीप्रदावतु . स
र्वाङ्गसून्दरीदेवीसर्वत्रसर्वदावतु . आनन्दरूपिणीदेवीचित्स्वरूपाचिदात्मिका . सर्वाङ्गसून्दरी
पातु सून्दरीभवसून्दरी . पृथगेवालयेघोरेसंकटेदूर्गमेगिरौ . अरण्येप्रान्तरेवापिपातुमांसून्दरी
शिवा . इदंकवचमित्युक्तं यन्त्रोधारश्चपार्वती . यःपठेत्प्रयतोभूत्वात्रिसन्ध्यंत्रियतःशुचिः .
तस्यसर्वार्थसिद्धिःस्यात्तद्यत्मनसिवर्तते . गोरोचनाकुंकुमेनरक्तचन्दनकेनवा . स्वयं
म्भूकुसुमैःशुक्लैर्भूमिपुत्रैशनिश्चरैः . श्मशानेप्रान्तरेवापिशून्यागारेशिवालये . सशक्त्य
त्रिगुणायन्त्रंपूजयित्वाकूमारिका . तन्मनूंपूजयित्वाचगुरुपङ्क्तिविशेषतः . पूजयि
त्वायथाशक्त्यास्तुत्वाचविधिनामुना . धारयेद्गुरुणायन्त्रंपूजयित्वाकूमारीका . तन्यो
नौपूजयित्वाचगुरुपङ्क्तिंतथैवच . देव्यैबलिनिवेद्याथनरमार्जारशूकरैः . नकुलैर्महिषै
र्मेषैःपूजयित्वाविधानतः . धृत्वासुवर्णमध्यस्थंकंठेवाह्यस्थकेभुजे . सुतिथौशुभनक्षत्रे
सूर्य्यस्योदयनेतथा . धारइत्वाचकवचंसर्वसिद्धिंलभेन्नरः . कवचस्यचमहात्म्यं
नाहवर्षंशतैरपि . शक्तामितमहेशानीवक्तुंतस्यफलंचतत् . नास्तिचौरभयंतस्यन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तत्राव्याधिपिडितं । नचदूर्भिक्षयंतत्र नरोगपिडनंसदा । विघ्नप्रशमनंसर्वंसर्वव्याधिवि
नाशनं । सर्वरक्षाकरंजंम्भोचतुर्वर्गफलप्रदं । यत्रतत्रनवक्तव्यंनदातव्यंकदाचन ।
मन्त्रंप्राप्यविधानेनपूजयेत्सततंसुधी । तत्रापिदुर्ल्लभंमन्नेकवचंदेवरूपिणं । गुरोप्रसम
द्यविद्यायांविद्याप्राप्यसुगोपितं । तत्रापिकवचंदिव्यंदुर्ल्लभंभुवनत्रयं । श्लोकंवास्त
वमेकंवायः पठेत्प्रयतः शुचि । तस्यसर्वार्थसिद्धिःस्याच्छंकरेणप्रभाषितं । गुरुदेवो
हरसाक्षापतितस्यचपार्वतिः । अभेदेनयजेद्यस्तुतस्यसिद्धिः नदूरतः - इतिश्रीविश्व
सारतन्त्रेत्रिपुरभैरवीकवचंसमाप्तं [※] अथलक्ष्मीकवचं । श्रीईश्वरउवाच ।
अथवक्ष्येमहेशानिकवचंसर्वकामदं । यस्यविज्ञानमात्रेणभवत्साक्षासदाशिव । अ
र्च्चनंपूजनंतस्यामन्त्रजापंजपेन्नरः । सभवेत्पार्वतीपुत्रसर्वशास्त्रपरस्कृतः । विद्या
वतार्थिनासेव्याविशेषेविष्णुवल्लभा । अस्यश्रीचतुरक्षरीविष्णुवनिताकवचस्य ।
भगवान् श्रीशिवऋषिः अनुष्टुप्छन्दः वाग्भवीदेवता । वाग्भवंबीजं । लज्जाशक्तिः र
माकीलकं । कामबीजात्मकंकवचं । ममःस्वकवित्व । पांडित्य सर्वसिद्धि । समृद्ध्ये वि
नियोगः । ऐँकारोमस्तकेपातुवाग्भवीसर्वसिद्धिदा । ह्रीँपातुचक्रयोर्मध्ये चक्षुयुग्मेचशां
करी । जिह्वायांमूरवदन्त्येच कर्णयोः दन्तयोर्णसि । ओष्ठाधरेदन्तपङ्क्तौतालुमूले हलौपुनः
पातुमांविष्णुवनिता । लक्ष्मीश्रीवर्णरूपिणी । कर्णयुग्मेभुजद्वंदे स्तनद्वंदे चपार्वती । हृदयेमणिवन्देच ग्रीवायांपार्श्वयोःपुनः
पृष्ठदेशेतथागुह्येवामेचदक्षिणेतथा । उपस्थेचनितंम्बेच नाभौजंघेद्वयेपुनः । जानूचक्रेपद
द्वन्द्वेगुटिकंगुलिमूलके । स्वधातूप्राणशक्त्यंमेसिमंत्यांमस्तकेपुनः । सर्वाङ्गपातुकामेशीम
हादेवीसमुन्नति । पुष्टिपातुमहांम्मायाउत्कृष्टिःसर्वदावतु । वऋषिःपातुमेदेवीसर्वत्रस्तुति
वल्लभा । वाग्भवीसर्वदापातुपातुमांहरगेहिणी । रमापातुसदादेवीपातुमायास्वरात्वयं । सर्वां
ङ्गेपातुमांनित्यंमुग्रतारासदावतु । पातुमांकालिकानित्यंकालरात्रिःसदावतु । नवदुर्गा
सदापातुकामाख्यासर्वदावतु । योगिनीसर्वदापातुमहालक्ष्मीसदामम । मात्रापातुःसदा
देव्याचक्रस्थायोगिनीगणा । सर्वत्रसर्वकार्येषुसर्वकर्मेषुसर्वदा । पातुमांदेवदेवेशी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

लक्ष्मीसर्वसमृद्धिदा । इतीतेकवचंदिव्यंकथितंसर्वसिद्धये । यत्रतत्रनवक्तव्यं यद्दिच्छे आत्मनोहितं । पठायभक्तिहीनायनिन्दकायमहेश्वरी । न्यनाड़ेनानिरिक्तेनदर्शयेनकदाचन । नःस्तवंदर्शयेदिव्यंसद्यश्रीवहाभवेत् । कुलीनायमहेशायदुर्गाभक्तिपरायच । वैष्णवायविशुद्धायदद्यात्कवचमुत्तमं । निजाशिष्यायशान्तायधर्मिणेज्ञानितेतथा । ज्ञानोमङ्गल वारेच ---------- । चन्दनैश्चलिखेन्मन्त्रंसर्वमन्त्रसमन्वितं । विलिखेत्कवचंदिव्यं स्वयंभुःकुसुमैःशुभैः । स्वशुक्रैःपरशुक्रैश्चनानागन्धसमन्वितैः । गोरोचनाकुंकुमेनरक्तचंदनकेनचा । सूतिथौशुभयोगेचाअकाशानोरवेदिने । अस्मिन्मांचमघासूचशुभनक्षसुभेदिने । पुर्वेभाद्रपदायोगेस्यात्यामंगलवासरे । विलिखेत्सपठेत्तोत्रंशुभयोगेसुरालये । आयुष्मान्प्रीतियोगेचब्रह्मयोगेविशेषतः । इन्द्रयोगेशुभेयोगेशुक्लयोगेतथैवच । कौलवेबालवेचैवव णिजेचैवसत्तमे । शून्यागारेश्मशानेवारिक्षेत्रेचविशेषतः । कुमारीपूजयीत्वाचयजेद्वीसंनातनीं । मत्स्यैर्मांसैःसाकल्पैःपूजयेत्परदेवतां । घृताद्यैश्चोपकारैश्चधूपदीपैर्विशेषतः । ब्राह्मणाभोजयित्वाचपूजयेत्परमेश्वरी । अथेवंतमुपास्यानं । तत्रकूर्म्योदिनत्रयं । तदाभवेन्महारक्षाकंरोगाच्चभाषितं । मारणद्वेषणादीनिलभतेनात्रसंशयः । सभवेत्पाधतीपुत्रः सर्वशास्त्रवहिःकृतः गुरुदेवहरसाक्षात्पत्नीतस्यहरप्रिया । अष्टैनजपेद्यस्तुतस्यसिद्धिर्नदूरतः । पठतियइहमर्त्यो नित्यमाचारात्माजयफलमनुमेनंलप्सतेसाविधीयं । सभवतिपदमूचैःसंपदांपादनम्रःक्षितिमुकुटलक्ष्मीलक्ष्मणानांचिराय: । इतिश्रीविश्वसारतन्त्रेलक्ष्मीकवचंसंपूर्णं ※ अथमातङ्गीकवचं । श्रीभैरवउवाच । श्रृणुदेवीप्रवक्ष्यामिमातंगीकवचंशुभं । गोपनीयंमहादेवीमौनजाप्यंसमाचरेत् । श्रीदेव्युवाच । साधुसाधुमहादेवकथयस्वमहेश्वरः एनम्याविधानेनसाधकानांजयंभवेत् । विनाध्यानंविनामन्त्रंविनाहोमंविनाबलिं यस्यस्मरणमात्रेणसाधकोधरणीपति । श्रीभैरवउवाच । मातङ्गीकवचंदिव्यंसर्वरक्षाकरंमुणु । कवियंविधानेनचेजोवीजैसूखानिच । सूखदंशुभदंसत्यमाशी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मादिप्रदायकं । ब्रह्मविष्णुमहेशानांतेषामाद्यामहेश्वरी । ॐ च्छीष्टचाण्डालिनीसूमुखी
देवीमहापिशाचिनीठः ठः ठः स्वाहा । श्लोकार्धश्लोकमेकंवा यस्तुसम्यक्पठेन्नरः । तस्यहस्ते
सहैवास्तिराजलक्ष्मीनसंशयः । उच्छिष्टवदनोभूत्वाकमलासनसंस्थितः । योनिमुद्रांकरे
वध्वाशक्तिध्यानपरायणः । ब्रह्मरन्ध्रसमानीयउच्छिष्टनामसंस्थितां । ललाटंलक्षयेनि
त्यंमहाचाण्डालिनीतिच । नेत्राभ्यांसूमुखीरक्षेद्देवीरक्षतुनासिकां । महापिशाचिनीचास्मान्मु
खेरक्षतुसर्वदा । लज्जारक्षतुमांदन्तेचाष्टसत्मार्जितेकरां । चिबुकेकंठदेशेचठकारत्रितयंततः ।
सविसर्गमहादेवीहृदयंपातुसर्वदा । नाभौरक्षतुमांनित्यंकालिकारक्तलोचना । उदरेपातुचा
मूण्डालिंगेकात्यायणीतथा । उग्रचण्डागुदेपातुपादौरक्षतुचाम्बिका । भुजौरक्षतुसर्वा
णीहृदयंचण्डभीषणां । जिह्वायांमातृकारक्षेत्पूर्वेरक्षतुपुष्टिका । उत्तरेकृत्तिकारक्षेन्मेधार
क्षतुचाग्नये । नैऋत्यांप्राज्ञयारक्षेद्वायव्यांपातुलक्षणा । इशान्यांरक्षयेद्देवीमातङ्गी
शुभकारिणी । उर्द्ध्वंपातुमहादेवीदेवानांहितकारिणी । पातालेपातुमांनित्यंवासुकीवि
श्वरूपिणी । कन्ठदेशेस्वरापातु आज्ञाचक्रेपातुगर्भकैः । ककारादिठकारान्तंद्वादशान्तेहृ
दिप्रिया । मणिपूरेडाडिपशान्तेदशवर्णास्वरूपिणी । षड्पत्रेषट्वर्णाभ्यांवादिलान्तां
सदावतुः । वादिशान्तेसदादेवीचतुष्पत्रेषूरक्षतु । ॐ क्रां श्रीं प्रीं च्छीं च्छीं ठः ह्रीं ठः ऐं ठः
स्वाहा । इयंमन्त्रंसमुच्चार्य्य — धाद्वामकेजुषे । कंठेवाधारयेद्यस्तुसचदेवोमहेश्वरः । तंद
ष्ट्वादेवताःसर्वेप्रणमन्तिसदूरतः । तस्यातेजःप्रभावेणगन्तुचैवनशक्यते । इन्द्रादीनांभजे
सत्स्वभूपतिःसेवकोपमः । इच्छासिद्धिर्भवेत्तस्यअणिमादिस्तथैवच । कीर्तिंचकवितां
लक्ष्मींमारणादिनियानिच । ससदाभजतेराज्ञांकदाचित्भक्तिपूजनात् । अज्ञात्वाकवचं
देवीसूमुखीयोजपेन्नरः । तस्यनश्यंतिदेवेशियोगिन्योभक्षयन्तितं । इहलोकेदुःख
भागीपरंमुक्तोभविष्यति । जन्मकोटिसदामुक्तोमन्त्रसिद्धिंनविन्दति । गुरुपादंपुरस्कृ
त्ययदामन्त्रंलभेत्सुधी । तदानुकवचंदेवीसकलागुरुसेवया । इहलोकेनृपोभूत्वापरमुक्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मवाप्नुयात् । नवोध्यात्परशिष्याय दूर्जनाय सुरेश्वरी । निन्दकाय कुसीलाय शक्तिहिंसा
परायच । योददाति सपापिष्ठो मातङ्गीकवचं शुभं । पिबन्तु रुधिरं तस्य योगिन्यो भक्षयन्ति
तं । ~~इहलोके दुःखभागि~~ तस्माद्रहस्यपरमं सर्वसिद्धिलभांतिते । गोप्यं गोप्यं तरं गोप्यं
गुह्यात्गुह्यतरं मतं । नप्रकाश्यमिदं भद्रे प्राणैः कण्ठगतैरपि । पूजाकोटिसमं स्तोत्रं स्तो
त्रकोटिसमाजपः । जपकोटिइमां विद्यां नप्रकाश्य कदाचनः । इति श्रीगुह्यकालीतन्त्रे
मातङ्गीकवचं संपूर्णं ॥ अथ भुवनेश्वरीकवचं । श्रीदेव्युवाच । भुवनेश्याश्च दे
वेशयाया विद्याप्रकाशिता । श्रुत्वाश्चाधिगताः सर्वाः श्रोतुमिच्छामि साम्प्रतं । त्रैलोक्य
मङ्गलं नाम कवचं यत्पुरोदितं । श्रीईश्वरोवाच । पार्वति शृणु वक्ष्यामि सावधाना
वधारय । त्रैलोक्यकवचं नाम कवचं मन्त्रविग्रहं । सिद्धिविद्यामयं देवी सर्वैश्वर्य्यप्र
दायकं । पठनान्धारणान्मर्त्यत्रैलोक्यैश्वर्य्यभाग्भवेत् । त्रैलोक्यमङ्गलं स्यास्य क
वचं मन्त्रविग्रहं । सिद्धिविद्यामयं देवि सर्वैश्वर्य्यप्रदायकं । समस्तफलमाप्नोति क
वचस्य ऋषिः शिवः । छन्दो विराट् जगद्धात्री देवता भुवनेश्वरी । धर्म्मकामार्थमो
क्षेषु विनियोगः प्रकीर्तिताः । ह्रीँ बीजं शिरः पातु भुवने शिललाटकं । ऐँ पातु दक्षने
त्रं मे ह्रीँ पातु वामलोचने । श्रीँ पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी । वामकर्णं स
दा पातु ऐँ घ्राणं पातु मे सदा । ह्रीँ पातु वदनं देवी ऐँ पातु रसनाममः । व्यक्तिपूजत्रिवर्णा
त्मा कंठं पातु पराम्बिका । श्रीँ स्कन्धौ पातु नियतं ह्रीँ पातु सधर्दा भुजौ । क्लीँ करौ त्रिपुटे
शानी त्रिपुटैः श्वर्य्यदायिनी । आँ पातु हृदयं देवी ह्रीँ मे मध्ये च तु देशसा (त्र्यक्षरी भुवनेश्वरी)
सर्वबीजं सदा पृष्ठं पातु सर्ववशंकरी । ह्रीँ पातु गुह्यदेशं मे नमो भगवतीं कटिं । माहेश्वरी सदा
पातु शक्तिबीजानुयुग्मकं । अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयं । सामां दशाक्षरी
पायादन्नपूर्णाखिलं वपुः । तारं मायारमाकामः षाडशार्णा ततः परं । शिरस्था सर्वतः
पातु विशत्यन्नास्तितामुदा । तारं दुर्गे युगं रक्षे स्वाहेति च दशाक्षरी । जयदुर्गा घनस्यामा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पातमांसर्वतोमुदा · मायावीजादिकाचैव षोडषार्णा ततःपरा · शिरस्था सर्वतःपातु विश
त्यन्नीस्थितामुदा · तारंदूर्गेयुगंरक्षस्वाहेदितिदशाक्षरी · जयदूर्गा घनश्यामा पातुमां
सर्वतोमुदा · मायावीजादिका चैषादशार्णा चततःपरं · प्रतप्तः कांचनाभासाजय
(ॐ ह्रीं दुं दूर्गायै नमः)
दूर्गाननेवतु · तारंह्रींदुंदूर्गायै नमोष्टवर्णात्मिकापरा · शंखचक्रधनूर्बाणधरामांद
क्षिणेवतु · (महिषमर्दिनीस्वाहा)वसुवर्णात्मिकापरा · नैऋत्यांसर्वदापातु महिषा
सुरनासिनी · मायापद्मावतीस्वाहा सप्तार्णा परिकीर्तिता · पद्मावतीपद्मसंस्था पश्चिमे
मांसदावतु · पाशांकुशप्रदा मायेहि परमेश्वरीस्वाहा · त्रयोदशार्णा ताराद्या साश्वरुध्धा
ननेवतु · सरस्वतीपञ्चशरो नित्याक्लिन्नेमदप्रदे · स्वहारत्यक्षरीनित्या मामुत्तरसदा
वतु · तारंमायांचकवचंक्षेचरंक्षततोवधू · ऊँक्षँह्रींफट्महाविद्याद्वादशाऽखिलप्रदा · अ
निष्टादिभिः पायाच्छिवकोणेसदाचमां · ऐँक्लींसौँः ततोबालामामूर्ध्वदेशतोवतु · वि
द्वन्ताभैरवीबालाभूमौमांसर्वदावतु · इतितेकवचंपूण्यं त्रैलोक्यमंगलंपरं · सारात्सारतरं
पुण्यंमहाविद्यौघविग्रहं · अस्यापिपठनात्सद्यः कुबेरोपिधनेश्वरः · इन्द्राद्यासकलादेवा
--- द्यात्पठनाद्यतः · सर्वसिद्धिश्वराः सन्तः सर्वैश्वर्य्यमवाप्नुयात् · पुस्मान्जल्याष्टकं
दद्यात्मूलेनैवपृथक्पृथक् · संवत्सरसत्तायास्तु पूजायाः फलमाप्नुयात् · प्रीतिमन्यान्य
तः कृत्वाकमलानिश्चलागृहे · वाणीचनिवसेद्वक्त्रे शत्यंशत्यनसंशयः · योधारयति
पूण्यात्मात्रैलोक्यमंगलाभिधं · कवचंपरमंपूण्यं सोपिपूण्यं वतांवरः · सर्वैश्वर्य्यपू
तोभूत्वात्रैलोक्यवीजयीभवेत् · पूरुषोदक्षिणेवाहौ नारीवामभुजेतथा · वहूपूत्रवतीभू
त्वावन्ध्यापिलभतेसुतं · ब्रह्मात्रादीनिशस्त्राणि नैवदंशन्तितंजनं · एतत्कवचमज्ञात्वायो
भुजेभुवनेश्वरीं · दारिद्र्यंपरमंप्राप्य सोचिरान्मृत्युमाप्नुयात् · इतिश्रीरुद्रयामले
देवीईश्वरसंवादेत्रैलोक्यमंगलंनाम भुवनेश्वरीकवचंसंपूर्णं ※ अथधूमावती
कवचंमाह · श्रीपार्वत्युवाच · देवदेवमहादेव भक्तानुग्रहकारकः · धूमावत्यास्तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कवचंब्रूहिमेकरुणानिधे । श्रीमहादेवउवाच । आत्मिगुप्तमंत्रो के कवचंशत्रुनिग्रहं । स र्वेप्सितप्रदंदेवीभावज्ञेनांप्रकाश्यते ॥ चच्छूत्यामचन्द्रेणसगरेणावसोहतः । भार्गवेणापियच्छ्रु त्वाजितंसर्वचराचरं । तमेवकवचंवक्ष्मिसावधानावधारयेत । कवचस्यमहादेविऋषिर्दत्तात्रेयः स्मृतः । छन्दोविराट्देवताचश्रीमद्धूमावतीप्रिये । शत्रूणांमारणेदेवीविनियोगःप्रकीर्तितः । ॐ धूमावतीसदापातुशिरोमेशत्रुमर्दिनी । चराऽरूपामहादेवीललाटेपातुमांसदा । क्षुत्क्षामां नयनेपातुभीमाश्रुतीमम । काकध्वजानासिकामेसर्वशत्रुविनाशिनी । प्रलंबीसर्वदापातुव दनंमूराऽमालिनी । विकटाव्यासदापातुगलंमेरिपुमर्दनी । धूंधूंबीजात्मकासदापातुघाटमेरीश्वरी रिणी । स्कन्धौकंकालिनीपातुश्मूराऽमुजविभूषणा । सव्कमां सासदापातुभीषणामेभुजद्वयं मदिराघूर्णनयनापातुपार्श्वेकंकिणी । सूप्पहस्ताचहृयंपातुभैरवनादिनी । शत्रूणांशाप्रियापातुपृष्ठमेऽधिरप्रिया । करालवदनापायुयु लिनीसदापातुकुक्षिमेशत्रुवाहिनी । वज्रतुण्डापातुनित्यंकटिदेशंशिवप्रिया । करालवदनापातु गुह्यदेशंदिगंम्बरी । घोरदंष्ट्राभिनीपातुजानुनीविचलद्विजा । पादौमेपातुशतंतंक्षुत्पिपासाकू लासदा । घोरकंकालसंघपातुसर्वांगेसंकटप्रिया । इतितेकथितंदेविकवचंरिपुनिग्रहं । यस्यप्रपठनाद्देवीसर्वसिद्धिःकरेस्थिता । नतस्यशत्रूपीडास्याद्दुष्टपीडाकदापिन । ग्रहपीडाभूतपीडानभवेत्कुलमूचरी । धूमावतींसमभ्यर्चकल्पपूर्वेणसाधकः । मस्त्यमांसासर्वदेवीपूजयित्वायथाविधि । महामांसस्यधूपेराधूपयेत्तांतुमन्त्रवित् । अष्टोत्तरशताद्दीपंदद्देकमनाप्रिये । पक्षमात्रेणदेवेशिरिपूहन्त्यानसंशयः । एतत्सर्वंमहेशानिमारणेवानियोजयेत । कवचस्मरणाद्देवी रिपवोनियमालयं । इतिश्रीरुद्रयामलेधूमावतीकल्पेधूमावतीकवचंसंपूर्णं ॥ अथ वगलामुखिकवचं । श्रीशिवउवाच । हिमवत्तनयागौरीकैलासेयाशिरोचये । पप्रच्छगिरीसंवीदेसाधकानुग्रहेच्छया । श्रीपार्वत्यूवाच । देवदेवमहादेवभक्ता नुग्रहकारकः । अस्माकंविद्यतेमंत्रोसत्यंसत्यंनिवेदयेत । विघ्नध्वंकालिकालो के यमकर्मपरायणाः । तेषांनिन्द्राकलालोकेवहवःकिरदूजना । वनावधांचितनूतेः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भूतकट्यभिमुक्तिभिः । तसामानू दिनासाये त्वयादेवि प्रकीर्तितः । योमंत्रवगलाम्रुख्या सर्वकामसमृध्दतः । कवचंतस्यमन्त्रस्यप्रकाशयविभोधुना । यस्यस्मरणमात्रेण गणानमग्रहोभवेत् । आत्मानंशत्रुतांक्षाविषाग्निंरिपुवाजितः । ईश्वरउवाच । श्रुत्वा तत्वार्थीतिवाक्यंशत्वात्यस्यमनोगतं । विद्वश्यतांपरैश्वर्य्यंमधूमाधीतिपूजयेत् । अ हतात्कवचंदेव्यैकृपयाकरुणानिधेः । प्रहरणद्वगलाम्रुख्याः कवचंसर्वसिद्धिदं । यस्यस्मरणमात्रेणवगलामूप्रसीदति । अस्यश्रीपीतम्बराबगलामूखीकवचस्य महादेव ऋषिः कवचस्य शक्रुच्छंदः श्रीपीताम्बरादेवताः ह्रींबीजंस्वाहाशक्तिः मम सर्वकामार्थसाधनेवि नियोगः । सर्वसिद्धिप्रदाकर्त्रीपातुमांवगलामूखी । पीताम्बरातथाग्नेर्त्र्यांयस्यमहि ममर्द्दिनी । नैरुत्यंचण्डिकापातुत्रिपूटिग्रहकारिणी । पातुनाम्मगदाहस्तापश्चिमांस् कवाहना । वायव्यांपातुमांकाली कौवेर्त्र्यांशिरावतु । ईशान्यांभैरवीपातुपातुनि त्यंपुरप्रिया । ऊर्ध्वंपातुमहेश्वरीपातुमध्यंमांललितावतु । अधस्थादपिमांमायावाराही चक्रधारिणी । मस्तकंपातुमांनित्यंश्रीदेवीवगलामूखीः । भ्रूंपीताम्बरापातु नेत्रे त्रिपूरभैरवी । श्रवणौविजयापातु नासिकांश्रृंगलंजया । सारदावदनंपातुजिह्वांपातु मूरेश्वरी । कन्धेरक्षतुरुद्राणीस्कंधौमेविन्धवासिनी । सुन्दरीपातुमेबाहू पातुदुर्गैक शैसदा । भवानीहृदयंपातुमध्यंमेभुवनेश्वरी । नाभिंपातुमहामायाकटिंकमललोचना । उरुमेपातुमातङ्गीजानुनीचापराजिता । जंघेकपालिनीपातु चरणौचश्चलेक्षणा । स र्वतःपातुमांनारायोगिनीपातुचाग्रतः । पृष्ठतः पातुकौमारी दक्षेपार्श्वेशिवावतु । रुद्राणीवामपार्श्वेतु सर्वदेवैश्चभीसदा । मुसर्वदेवेषुरक्षिविजयिनाक्षिनी । इत्येतत्कवचंदिव्यंधर्मकामार्थसाधनं । गोपनीयंप्रयत्नेन कस्यचित्नप्रकाशितं । यस्यकस्यैकुलीनस्यैतत्कवचंमन्मुखोदितं । ससर्वान्लभतेकामान्नात्रकार्य्यविचारणा । अपुत्रोलभतेपुत्रंमूर्खोविद्यावानभूतले । महाकवित्वमाप्नोतिदेवीत्वत्कवचंपठेत् । त्वोभैरवोदितं ।

Prof. Madhav Prasad Ghimire Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तस्यास्तु शत्रवो यान्ति यमस्य भुवनं शिवे . २३ . इति रुद्रयामले वगलामुखिकच संपूर्णं

※ इति श्री कौलरस्य सर्वागमसारे अनेकार्थनिर्णयो नाम त्रिंसत्तमः पटलः संपूर्णं समाप्तं शुभम् . १९९८ माघसुक्लव मा.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

CLASS ROUTINE

Days.	1st Hour	2nd Hour	3rd Hour	4th Hour	5th Hour	6th Hour	7th Hour
Mon.							
Tues.							
Wed.							
Thur.							
Fri.							
Sat.							

STANDARD'S

Machine made Envelopes, Writing Cabinets, Social and Ceremonial Cards, Box Stationeries and Fancy Note Papers, Swan, Bengal, Bharat Exercise Books, Swan Note Books, Drawing Books, Graph Books, Practical Books, etc. are the best and cheapest

Obtainable from all Stationers.

Dutt Printing Works, 24, Bagmari Road, Calcutta.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal